Chap-4

# संदर्भग्रंथाः


1-नाट्यशास्त्रम् : भरतमुनिः 202

2-ध्वन्यालोकः : प्रथमाननम्

3-काव्यानुशासनम्: हेमचन्द्रः 1:106

4-नाट्यदर्पणम् : रामचन्द्र गुणचन्द्रः306


# चतुर्थः परिच्छेदः

# (क) रसस्वरूपम्

श्रृंगारहास्यकरुणरौद्रवीरभयानकाः। बीभत्साद्भुतशान्ताश्च नव नाट्ये रसाः स्मृताः।।इति। दण्ड्युद्भटयोर्मध्येऽन्यः कश्चिदाचार्यो नाभवत, अतो विद्वांसोऽनुमन्यन्ते यथा शान्तरस उल्लिखित स्तेनेदमनुमीयने यत्तेन स्वसमयप्रसिद्वायाः रससंख्यायाः ग्रहणमात्रं कृतम्। शान्तरसोऽयमुद्भटं यावद्रसशास्त्रिभिः स्वीकृतोऽभूदित्यर्थः। उद्भटस्तु परम्परामपालयत्। इदमपि सम्भाव्यते यदुद्भटेन नाट्यशास्त्रभाष्ये—यदद्यत्वे नोपलभ्यते—शान्तरसस्य तर्कयुक्ता स्थापना कृता भवेत्। ईदृशां स्थितौ केवलमिदमेव मननीयं स्याद् यच्छान्तसहितानां नवरसानां प्रथमतयोल्लेखस्तावदुपलब्धग्रन्थेषु सर्वतः प्रथममुद्भटस्य काव्यालंकारसङ्ग्रह एवोपलभ्यते। वामनेन न रससंख्योल्लिखिता, नापि सर्वेषां नामानि गृहीतानि। परं रूद्रटेन नवसंख्यास्वीकारेण सह शमस्य प्रेयोदं नाम्नो रसस्य वृद्धिः कृता—

श्रृंगारवीरकरुणा बीभत्साद्भुतभयानकाद्भुता हास्यः। रौद्रः शान्तः प्रेयानिति मन्तव्याः रसाः सर्वेः।।इति।। अयं स्नेहस्थायिभावकः प्रेयान् रसो मन्ये रूद्रटस्यैव स्वकल्पना स्यात्। विद्वद्वर्गेण त्वयं मान्यतां न नीतः। प्रमाणञ्चात्र यद्रुद्रटसमकालिकेन रूद्रभट्टोऽपि स्वकीये श्रृंगारतिलके केवलान्नवैव रसानवर्णयत्। वस्तुतो रूद्रटोऽपि कस्यचिदेकस्य रसभेदस्य नवीनकलपनां प्रति विशेषेणाग्रहिलो नासीत्—स तु लोल्लटादीनां कतिपयेषां कान्तिकारिणिां प्राचीनाचार्याणामनुगतोऽभूद्, ये रसानन्त्ये श्रद्धते स्म। तस्येयमासीत्स्वधारण—रसनाद्रसत्वमेषांमधुरादीनामिवोक्तमाचार्यैः। निर्वेदादिष्वपि तन्निकाममस्तीति तेऽपि रसाः।।इति।।रसो हि नाम नास्वादः, अपि त्वेष आस्वादः। नायमनुभवः, अनुभवविषयः खल्वयमिति भावः। न रसो विषयिगतः, अपि तु विषयगतोऽसाविति शब्दान्तरम्। विविधैभविविभावानुभावव्यभिचारिभावैःसमन्वितस्त्रिविधैरभिनयैश्वाभिव्यञ्जितः स्थायी भाव एव रसरूपे नाट्यरसरूपे वा परिणमति। यथा व्यञ्जनदिभिः संस्कृतमन्नमेव षाडवादिभोज्यरसरूपं धारयति, तथैव नाट्यसामग्रीभूतैर्विविधैभविस्त्रिविधैरभियैश्च प्रस्तुतः स्थायीभाव एव नाट्यरसतामुपैति। अत्र स्थायी भावोऽन्नेन नाट्यसामग्रीं च व्यञ्जनौषध्यादिभिरूपमीयते। अभिनवगुप्तेनास्य सादृश्यस्यावयवेष्वपि संगतिं स्थापयितुं प्रयतितम्, परं न तदतिसमीचीनं नापि चापेक्षितम्, तेन हि मूलतथ्यमस्तव्यस्तीभवति, न च स्पष्टीभवति। स्थायीभावो न रसः, अपि त्वेष रसाश्रयः। नाट्यसामग्रीसमन्वितो ह्येष रसतामेति। यथाऽन्नं न रसः, अपितु रसाधारः, व्यञ्जनादि संस्कृत हि तद् रसीभवति। तथा रतिः स्थायीभावः स्वरूपेण नास्ति श्रृंगारो रसः, अपितु नायकनायिकास्मितकटाक्ष—हर्षवितर्कादिभिर्विभावानुभावव्यभिचारिभिः प्रसत्तैरन्वितन्त्रिविधेनाभियेन च रंगे प्रस्तुतः श्रृंगाररसव्यपदेश्यतामेति।

अत्र स्थायिभावपदेन न कविसहृदययोरपितु नायकादेरेव रत्यादिरभिप्रेयते, नायकादिश्च लोकप्रतिनिधिः, अतस्तदीयो रत्यादिः सामान्येन लोकस्यैव स्थायिभावः। इत्थं रसो न कलाया आस्वादः, अपि तु कलैव कलात्मिका स्थितिः सती स्वयमास्वादविषयतामेति। सहृदयो रसमास्वादयति परमेष आस्वादो हर्षादिरूप एव न रसरूपः।

हर्षादिश्च द्वावर्थौ– रसास्वादो न केवलानन्दमयः, अपितु तत्तत्स्थायिभावानुसारितया नानारूप इत्येकः। भरतेन हर्षादिशब्दे आदिपदेन हर्षविरोधिन्यः प्रतिकूला अनुभूतयो न गृहीताः, प्रत्युत कुतूहलप्रभृतयः आनन्दमय्योऽनुभूतय एव संकेतिता इत्यपरः।

प्राचीनाचार्येषु रामचन्द्रगुणचन्द्रौ प्रथमम्, अभिनवगुप्तश्च द्वितीयं मतमनुगतः। आधुनिका विद्वांसः शनैः शनैः प्रथममेवार्थमाद्रियमाणाः सन्ति, यद्यपि द्वितीयस्यानन्दवादिमतस्य समर्थका अपि पर्याप्ता विद्यन्ते, वयमपीदमेव पुष्णीमः। इत्थं भरतस्य नानाभावोपगतः स्थायीभाव एव रसत्वेनाभिमतः। स्पष्टमभिधीयते चेत् स विभावानुभावव्यभिचारिभावैः समन्वितं वाचिकांगिकसात्विकैरभिनयैश्चाभिव्यञ्जितं स्थायीभावमेव रसममन्यत। ततो रसः काचिद् भावमूला कलात्मिका स्थितिरस्ति, या कविनिबद्धानां विभावानुभावव्यभिचारिभावानां प्रसंगेन नाट्यसामग्र्या रंगमञ्चमुपतिष्ठति। यथा रम्यैस्तपोवनदृश्यैरलङ्कृते रंगे दुष्यन्तशकुन्तलानुकारिणौनटीनटौ वाचिकांगिकसात्विकैरभिनयैरनुभावव्यभिचारिभावादीनभिव्यञ्जयन्तौ रतिं नाम स्थायिभावं कार्त्स्न्येन प्रस्तुवन्तौ कामपि रमणीयां भावमूलां स्थितिमुत्पादयतः। या सहृदयस्य प्रेक्षकस्य चित्ते हर्षकुतूहलादीन् जागरयति। इयं रमणीया भावमूला स्थितिरेव भरतस्य रसः, सहृदयस्यानुभूतिस्त्वेतद्विलक्षणा। सा त्वस्या आस्वादः यो हर्षकुतूहलादिरूपेणानुभूयते। इयं स्थितिर्न नाट्यसौन्दर्यमात्रम्, नहि नाट्यलंकारवस्तुनोः सौन्दर्यमिव रसः, अपि तु नाट्यसौन्दर्यस्य वा माध्यमेन स्थायिभावोपस्थितिरेव रस इति। रसस्येयं परिभाषा विषयगता, भरतविवेचनाधृततया मौलिकी। ध्वनिप्राक्कालिकैरलंकारवादिभिरियं काव्यक्षेत्रेऽप्यनेनैव रूपेण गृहीता, अस्याश्च रूपं केनचित्परिवर्तनेनेदृशं निष्पन्नम्। शब्दार्थसौन्दर्यमाध्यमेन विभावानुभावव्यभिचारिभावसमन्वितः स्थायी भाव एव रसरूपतां प्राप्नोतीति——'प्राक्प्रीतिर्दर्शिता सेयं रतिः शृंगारतां गता।

रूपबाहुल्ययोगेन तदिदं रसवद्वचः।।इति काव्यादर्शः।

विभावादिभिरपोषिता रतिः केवला प्रीतिरेव भवति। परं तैः परिपोषिता शृंगाररसतया परिणमति। अत्रापि रसो विषयगत एव, आस्वाद्यरूप एव वा प्रतिपादितो नास्वादरूपः।

भरतसूत्रव्याख्यातॄणामाचार्याणां विवेचनेन रसस्वरूपं क्रमाद् विषयिगतमभूत्, आस्वाद्यतां विहाय च रसः आस्वाद्यतां गतः। अस्या अर्थपरिवृत्तेरुत्तरदायितमस्तत्रभवान् अभिनवगुप्तोऽभवत्। स किल शैवाद्वैतवादस्य प्रख्यातोऽभूदाचार्यः। अतोऽसौस्वकीयया दार्शनिक्या मेधया रसविवेचनमपि शैवाद्वैतसिद्धान्तरागेण रञ्जितवान्। सोऽमन्यत् रसपदार्थो वा आनन्दः,

आनन्दश्चायमात्मगतो न तु विषयगतः। विषयस्तु केवलमात्मपरामर्शस्यात्मास्वादस्य वा माध्यममात्रम् येन प्रमाता संविद्विश्रान्तिं विन्दति। सेयं संविद्विश्रान्तिरेवानन्दः। अतो रसस्य नाट्यगतत्वं न सम्भवति, नाट्यं तावत् संविद्विश्रान्तिरूपस्यास्य रसस्य माध्यममात्रम्। रस्यामवतरणिकायां रसस्यानन्देतरत्वस्य कल्पना स्वतो निराक्रियत। अभिनवगुप्तादारभ्य पण्डितराजजगन्नाथं यावद् रसस्येदमेव स्वरूपं स्वीकृतमभूत्, प्रतिपादनाधारे क्वचित्किञ्चित्परिवृत्तेऽपि प्रतिपाद्यं तदेवास्थात्।
विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरितिः महर्षिभरतसूत्रम् नेदं वस्तुतो रसलक्षणम्। मान्यतां नामाभिनवगुप्तोऽयं रसलक्षणत्वम्–'एवं क्रमहेतुमभिधाय रसविषयं लक्षणासूत्रमाहेति। अयं भावः–उद्देशलक्षण-परीक्षाइतिशास्त्रपर्वाणि। तत्रोद्देशपर्वणि प्रतिपद्यानां पदार्थानां क्रमेण निर्देशः, लक्षणपर्वणि च क्रमहेतुकथनपुरस्सरं तेषां लक्षणम्, परीक्षापर्वणि चाव्याप्त्यतिव्याप्त्यसम्भवादीनां लक्षणदोषाणां प्राप्तिप्रतिषेधाभ्याम् लक्षणस्य परीक्षणं क्रियते। तथात्र भरतनाट्यसूत्रेष्वमपि उद्देशक्रमप्राप्तस्य रसस्य क्रमे हेतुमुपन्यस्य तस्य लक्षणमनेन सूत्रेणोक्तमित्यभिनवभारत्या विवृतम्। वस्तुतस्त्विह सूत्रे रसनिष्पत्तिराख्यायते न तत्स्वरूपम्। परं तत्स्वरूपनिरूपणमप्यत्रैवान्तर्हितम्, एतत्सूत्रमेवाधृत्य ग्रन्थे रसस्वरूपं पल्लवितम्। स्वयं भरतेन स्वमतमेवं प्रकाशितम्—
'यथा हि नानाव्यञ्जनौषधिद्रव्यसंयोगाद्रसनिष्पत्तिर्भवति, यथा हि गुडादिभिर्द्रव्यैर्व्यञ्जनैरोषधिभिश्च षाडवादयो रसा निर्वर्तन्ते तथा नानाभावोपगता अपि स्थायिनो भावा रसत्वमाप्नुवन्तीति।'1

## ख-रसस्य दार्शनिकं स्वरूपम्

अत्राह रस इति कः पदार्थः? उच्यते। आस्वाद्यत्वात्। कथमास्वाद्यते रसः। यथा हि नानाव्यञ्जनसंस्कृतमन्नं भुञ्जाना रसानास्वादयन्ति सुमनसः पुरुषा हर्षादींश्चाधिगच्छन्ति तथा नानाभावाभिनयव्यञ्जितान् वागंगसत्त्वोपेतान् स्थायिभावानास्वादयन्ति सुमनसः प्रेक्षका हर्षादींश्चाधिगच्छन्ति तस्मान्नाट्यरसा इत्यभिव्याख्याता इति नाट्यशास्त्रे।
अभिनवगुप्तेन रसस्वरूपमेवं विश्लेषितम्—तत्र नाट्यं नाम नटगताभिनयप्रभावसाक्षात्काराभ्यणकघनमानसनिश्चलताध्यवसेयः समस्तनाटकान्यतमकाव्यविशेषाच्च द्योतनीयोऽर्थः। स च यद्यप्यनन्तविभावाद्यात्मा, तथापि सर्वेषां संविदि तस्याञ्च भोक्तरि भोक्तृवर्गस्य च प्रधाने भोक्तरि पर्यवसानाद् नायकाभिधानभोक्तृविशेषस्थायिचित्तवृत्तिस्वभावः। सा चैकचित्तवृत्तिः स्वकीयपरकीयमितिप्रतीयमानानान्तचित्तवृत्यन्तरशतविशेषितालौकिकगीतगेयपदादिलास्यांगदशकोपजीवनस्वीकृतलक्षणगुणालंकारगीतातोद्यादिसम्यक्सुन्दरीभूतकाव्यमहिमप्रयोगमालाभ्यासविशेषाश्रयत्वात् स्वपरभावाव्याविता, अत एव साधारणीभूततया

सामाजिकानपि स्वात्मसद्भावेन समावेशयन्ती, तादात्म्यादेव चानुमानागमयोगिप्रत्यक्षादिकरणकतटस्थप्रमातृप्रमेयपरकीय लौकिकचित्तवृत्तिविलक्षणतया निर्भासमाना, परिमितस्वात्माश्रयतानिर्भासनाविरहाच्च लौकिकप्रमदादिजनितनिजरतिशोकादिवच्चित्तवृत्यन्तरजननाक्षमा, अत एव निर्विघ्नस्वसंवेदनात्मकविश्रान्तिलक्षणेन रसनापरपर्यायेण व्यापारेण गृह्यमाणत्वाद् रसशब्देनाभिधीयते।

अभिनवगुप्तव्याख्यानशैलीयमर्थगरिमशब्दाडम्बरोभयविचित्र-संयोगशीलाऽसुगमेति विवेचनमपेक्षते। लोकप्रतिनिधिप्रधानपात्रचित्तवृत्तिरूपः स्थायिभावो हि काव्यनाट्यान्यतरसौन्दर्यबलेन साधारणीकृतः सामाजिकचित्तवृत्तितादात्म्यं सीापयन्, निर्विघ्नदेशकालसीमविनिर्मुक्तः, संविद्विश्रान्तिसतत्वेन रसनीयतया रसात्मतया परिणमति। यथा शकुन्तलादुष्यन्तरूपारोपकुशलौ कुशीलवौ समुपस्थितौ तपोवनमञ्जुकुञ्जेषु प्रथमं समागतौ परस्पराह्लादकरसौन्दर्यदर्शनविस्मितौ तृषितोत्सुकलोचनौ मिथः पश्यतः। अनिच्छयापि गच्छन्ती च शकुन्तला हृत्वन्तरच्छलेन दुष्यन्ते दृष्टिं निक्षिपति। वियोगे चौत्सुक्यनैराश्याभ्यां व्यग्रौ मिथः समागमायातुरीभवतः। दिष्ट्या शकुन्तला सखीजनसहकारेण दुष्यन्तं प्रति प्रणयं निवेदयितुं पत्रप्रेषणावसरं विन्दति। तावत्तत्राकस्मादुपस्थितस्य दुष्यन्तस्य तस्याश्च रहः संगतं भवति। अस्मिन् कृत्स्नेऽपि विभावानुभावव्यभिचारिप्रपञ्चे काव्यसंगीतरंगवैभवादिसाहाय्येन मञ्चे प्रदर्शितः प्रेक्षकाणां चित्ते वासनात्मतया स्थितो रतिः स्थायीभावः समुद्बुध्य तथोद्दीप्यतेतमाम्, यथा निष्प्रत्यूहाः प्रेक्षका विस्मृतव्यक्तिदेशकालव्यवधानाः प्रस्तुतप्रसंगे तन्मयीभावादात्मविश्रान्तिमय्यामानन्दचेतनायां निमज्जन्ति, इयमानन्दचेतनैव रसः। इत्थं समासतोऽभिनवदृशा नाट्यादिसेवनेन भावभूमिकायामात्मविश्रान्तिमयीयमानन्दचेतनैव रसव्यपदेश्यतामेति।

अभिनवात्परं मम्मटेनापीयमेव परिभाषा व्याख्याता, पण्डितराजजगन्नाथपर्यन्तञ्च निरन्तरमियं प्रावहत्, पण्डितराजस्तु शैवदर्शनस्थाने केवलमावरणभंगाय नव्यन्यायवेदान्तदर्शने अशिश्रियदिति भेदः। संस्कृतकाव्यशास्त्रे रसपदं सामान्येन काव्यसौन्दर्येऽर्थेऽपि प्रयुज्यते, यथा दण्डिना माधुर्यगुणविवेचने रसपदमस्मिन्नेवार्थे प्रयुक्तम्—

'मधुरं रसवद् वाचि वस्तुन्यपि रसस्थितिः' 'कामं सर्वोऽप्यलंकारो रसमर्थे निषिञ्चतु।' इति। अत्र वाचि शब्दे वा रसस्थितिः, अलंकारकृतो वार्थे रसनिषेकः, इत्यमू तथ्ये इदमेव वस्तु संकेतयतो यत्प्रस्तुतप्रसंगे भावमूलकं काव्यसौन्दर्यं न रसपदार्थः, अपि त्वभिव्यक्तिसौन्दर्यमात्रम्। वस्तुतो नायं परिनिष्ठितः पारिभाषिको रसपदार्थः। अथाप्यस्य यथावदेव प्रवृत्तिः। अभिव्यक्तिसौन्दर्ये रसशब्दप्रयोगो न व्यवहारमात्रे अपि तु साहित्येऽपि सामान्येन भवति। लक्षणया खल्वयं मूलार्थविस्तरः, न खल्वाह्लाद एव रसपदार्थः अपि तु रागात्मक आह्लादः, अयं च शब्दार्थचमत्कारे नानिवार्यतया नियतः। अतः समासेन रसपदस्य त्रयोऽर्थाः—

भावमूलकं काव्यसौन्दर्यं भावस्य कलात्मिका वाभिव्यञ्जना।

भावमूलकस्य काव्यसौन्दर्यस्यानुभूतिः। सामान्यं काव्यसौन्दर्यञ्चेति। अमीष्वयं तृतीयो न परिनिष्ठितः, अपि तु केवलं व्यावहारिकः, अशास्त्रीयत्वात्। रसस्य परिभाषेयं विषये विषयिण्यपि। द्विधा स्थितापित्रैविध्यं पुनरेवोपगच्छति।।रसो हि काव्यसौन्दर्य क्वचित्स्याद् भावमूलकम्। क्वचित्तस्यानुभूतिश्च सामान्यमथ तत्क्वचित्।।

केषाञ्चित्सम्मता भावाभिव्यक्तिः सा कलात्मिका। केषाञ्चनानुभूतिश्च तस्या इति विवेचितम्।।तत्रैकं विषयालम्बि विषयूयालम्बि चापरम्। रसस्वरुपमित्येवं संगिरन्ते द्विधा बुधाः।।उल्लिखितव्याख्याधारेण संयुक्तिकमिदमुक्तं भवति यदिहं द्विविधं रसस्वरूपमिति। विषयगतम्, भावस्य कलात्मिकाऽभिव्यक्तिः, भावमूलकं वाकाव्यसौन्दर्यमित्येकम्। विषयिगतम्—काव्यसौन्दर्यास्वादो वेति द्वितीयम्।

अनयोराद्यं मौलिकं सदपि प्रायस्तिरोभूतम्, अपरन्त्वनुभूतिपरकमवशिष्टम्। भवतु नाम किमर्थेतिह्यं तथ्यम्, अस्तु च नाम भरतस्यापि यः कश्चिदाशयः। भारतीये साहित्ये साहित्यशास्त्रे वाभिनवप्रतिपादितमास्वादपरकमेव रूप मान्यतांगतम्। विषयगतो भरताभिमतो वार्थः काव्यस्य वाचकोऽभूत् न रसस्य। भावस्य कलात्मिकाभिव्यक्तिः काव्यं, न रसः। इत्थञ्च परिभाषितस्य काव्यस्यास्वादो रसः। भारतीयकाव्यशास्त्रे रसस्य प्रतिनिधिभूतः परिनिष्ठितश्चार्थोऽन्ततः किलायमेवामन्यत। अथास्यैव सन्दर्भे रसस्वरूपविवेचनं सार्थकं स्यात्। अस्तु,अभिनवेन रसस्वरूपं तावदिदं निरुक्तम्—तत्रलोकव्यवहारेकार्यकारणसहचारात्मकलिंगदर्शनेस्थायूयात्मपरचित्तवृत्यनुमान भ्यासपाटवादधुना तैरेवोद्यानकटाक्षवीक्षादिभिर्लौकिकीं कारणत्वादिभुवमतिक्रान्तैर्विभावनानुभावनासमुपरञ्जकत्वमात्रप्राणैः, अतः एवालौकिकविभावादिव्यपदेशभाग्भिःप्राच्यकारणादिरूपसंस्कारोपजीवनख्यापनाय विभावादिनामधेयव्यपदेश्यैर्भावाध्यायेऽपि वक्ष्यमाणस्वरूपभेदैर्गुणप्रधानपर्यायेण समाजिकधिय सम्यग्योगं सम्बन्धमैकाग्र्यं वाऽऽसादितवद्भिः, अलौकिकनिर्विघ्नसंवेदनात्मकचर्वणागोचरतां नीतोऽर्थश्चर्व्यमाणातैकसारो न तु सिद्धस्वभावः, तात्कालिक एव न तु चर्वणातिरिक्तकालावलम्बी सीायिविलक्षण एव रसः। इति।

तेनालौकिकचमत्कारात्मा रसास्वादः स्मृत्यनुमानलौकिकस्वसंवेदनविलक्षण एव। तथाहि लौकिकेनानुमानेन संस्कृतः प्रमदादिर्न ताटस्थ्येन प्रतिपद्यते। अपितुहृदयसंवादात्मकसहृदयत्वबलात्पूर्णीभवद्रमास्वादाङ्कुरीभावेनानुमान स्मृत्यादि सोपानमनारुह्यैव तन्मयीभावोचितचर्वणाप्रयणतया प्रमदादिविभावः प्रतिपत्तिमेति।

न च सा चर्वणा प्राङ्मानान्तरात्। येनाधुना स्मृतिः स्यात्। न चात्र लौकिक प्रत्यक्षादिप्रमाणव्यापारः। किन्त्वलौकिकविभावादिसंयोगबलोपनतैवेयं चर्वणा। सा च प्रत्यक्षजनिततटस्थपरसंवित्तिज्ञानात् सकलवैषयिकोपरागशून्यशुद्धपरयोगिगतस्वानन्दैकघनानुभवाच्च विशिष्यते। एतेषां यथायोगमर्जनादिविघ्नान्तरोदयात्ताटस्थ्यास्फुटत्वविषयावेशवैवश्येन च सौन्दर्यविरहाद् आल्हादकत्वाभावाद्वा रसचर्वणैभ्यः सर्वेभ्यो विभिद्यते।

अतो विभावादीनां रसं प्रति न कारकहेतुत्वम् तथा सति हि विभावादिज्ञाननिवृत्तावपिरसनिष्पत्तिसम्भावना स्यात्। इदमेवाभिनवेनापीत्थं

प्रतिपादितम्। अत एव विभावादयो न निष्पत्ति हेतवो रसस्य, तद्बोधापगमेऽपि रससम्भव प्रसंगात्। नापि ज्ञप्तिहेतवो येन प्रमाणमध्ये पतेयुः। सिद्धस्य कस्यचित्प्रमेयभूतस्य रसस्याभावात्। किं तर्हि एवद्वि विभावादय इति। अलौकिक एवायं चर्वणोपयोगी विभावादिव्यापारः। क्वान्यत्रेत्थं दृष्टिमितिचेद् भूषणमेतदस्माकमलौकिकत्वसिद्धौ। पानकरसास्वादोऽपि किं गुडमरिचादिषु दृष्ट इति समानमेतत्।

इत्युक्तेषूद्धरणेषु पुनरप्यभिनवस्य प्रतिपादनशैली विशदव्याख्याननिध्नतामेति। समासतोऽयं तन्मतसारः—लोके रत्यादिभावानां यानि द्योतकपोषकानि कारणानि भवन्ति तानि काव्यनाट्ययोर्विभावानुभावव्यभिचारिभावपदै-
रभिधीयन्ते। काव्ये निबद्धानां हि तेषां कारणकार्यादिसम्बन्धविमुक्तानां लौकिकत्वं नश्यति, अलौकिकत्वञ्चैतान्युपयान्ति।

सहृदयकृतमेतदलौकिकविभावानुभावव्यभिचारिभावसमवायस्य प्रत्यक्षं मानससाक्षात्कारापर्यायं चर्वणं वा रस इति।

अयं रसश्चर्वणादास्वादाद्वा न भिद्यते, आस्वाद एवायम्। नास्वाद्यं न वा स्वादविषयः। अतो न स्थायीभाव एव रसः। अलौकिकविषयास्वादरूपतयारसःस्वयमप्यलौकिकः,

स्मृत्यनुमानप्रत्यक्षादिविलक्षणानुभवः। नायं कार्यो न च ज्ञाप्यः। नेदंसविकल्पकं नापि निर्विकल्पकं ज्ञानम्। यथा च रसपरिभाषाप्रकरणे प्रतिपादितम्, चर्वणाया अस्यां स्थितौ प्रमातृचित्तं देशकालस्वपरतटस्थादिसीममुक्तमेकाग्रमात्मविश्रान्तिमयं भवति। रसः किलानिवार्यतयाऽऽत्मविश्रान्तिमयी काचिदानन्दचेतनेति।

परवर्तिभिराचार्यैः प्रकारान्तरैः प्रायोऽमी एव रसस्य विशेषा व्याख्याताः। चतुर्दशशताब्दीभवः सङ्ग्राहकाचार्यो विश्वनाथो रसस्यरूपविषयकस्यास्य व्याख्यानविश्लेषणस्यसारांशममीभिःशब्दैः

प्रस्तुतवान्—सत्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः। वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः।। लोकोत्तरचमत्कारप्राणः कैश्चित्प्रमातृभिः। स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः। इति साहित्यदर्पणे।2

एतत्परिभाषानुसारेण रस आस्वादविषयः, किन्तु स्वाकारवदभिन्नत्वेन, यतो ह्यास्वादाभिन्न एव रसः, स किलास्वादरूपः।

सत्वोद्रेके च तदाविर्भावः। च चाखण्डः। वेद्यान्तरस्पर्शशून्यः। स्वप्रकाशानन्दात्मा। चिन्मयः। लोकोत्तरचमत्कारसारः। ब्रह्मास्वादसहोदरश्च तेन हि भृशं समानतां भजते। अत्रोद्धरणे शास्त्रीया पारिभाषिकी वा शब्दावली श्रूयते। अतोऽस्याधुनिक्या शब्दावल्या पुनराख्यानमपेक्ष्यते।

'रसः स्वाकारवदभिन्नत्वेनास्वाद्यते।' इत्यस्यायमभिसन्धिः यद्रसो मूलादास्वाद एव, नास्वाद्यः। तथापि व्यवहारतो 'रस आस्वाद्यते' इति प्रयुज्यते। इमं विरोधंपरिहर्तुमद्वैतसिद्धान्तः शरणीकरणीयः। अद्वैतदर्शने किलैक एवात्मास्ति, स चानन्दमयः, आनन्दस्वभावो वा नायं भोग्यो नापि भोक्ता। तथापि व्यवहारतस्तेनात्माऽऽनन्दो भुज्यत इति शास्त्रगिरः प्रवर्तन्ते। इत्थमात्मा, आनन्दो भोगश्च—आस्वादयिता, आस्वाद्यः, आस्वादश्चेति तत्वत एकमेव, व्यवहारमात्रकृतो भेदः। 'रस आस्वादरूपो नास्वाद्यः' इत्यस्यायमभिप्रायः यद् भरतो ध्वनिप्राक्कालिका

अलंकारवादिनश्च रसस्य वस्तुपरकत्वं व्याख्यातवन्तस्तदसमीचीनम्। शब्दार्थसौन्दर्यं नाट्यसौन्दर्यं वा न रसपर्यायः। ते तु काव्ये नाट्ये वा रसनिमित्ते। रसस्तयोरास्वादः। काव्यनाट्यनिमित्तकः किलात्मतत्वास्वादो रस इति दार्शनिकी शब्दावली। रजतमोभ्यामस्पृष्टं मनःसत्वम्। सांसारिकाभ्यां रागद्वेषाभ्यां विनिर्मुक्तस्य चित्तस्य वैशद्यमेव सत्वोद्रेकः। रसो रागद्वेषविनिर्मुक्तस्य चित्तस्य वैशद्ये समाहितौ वा शक्य आस्वादयितुमित्याशयः। अयमास्वादः खल्वैन्द्रियोत्तेजनादिभिन्नः सात्विकोऽन्यन्त परिष्कृतकोटिको भवतीति प्रथमतो भट्टनायकः प्रत्यतिष्ठिपत्, अभिनवश्चैनां प्रतिष्ठापनां प्रायो यथावदेवाभ्यमन्यत।

'अखण्डो रसः'—इत्यस्या उक्तेर्व्यापकः कश्चिदर्थः। प्रथमस्तावदयमाशयो यद् रसानभूतौ विभावानुभावव्यभिचारिभावानां न पृथक्प्रतीतिरपितु समञ्जिता, एकान्विता वाऽनुभूतिः। अपरश्चायं यद्रसानुभवे आत्मनः सर्वथा तन्मयीभावान्मात्राभेदो न भवति, तारतम्यात्मिका कोटयो न भवन्ति। न खलु पूर्णतायां सम्भवति तारतम्यम्। पूर्णाद्धि पूर्णतरमकल्पनीयमेव। अपूर्णत्वे च न रसावस्थत्वम्। 'रसानुभवो वेद्यान्तरस्पर्शशून्यः।' यथात्र विशदीकृतम्, रसो हि नाम पूर्णा तन्मयीभावस्थितिः, तत्र च स्वभावादेव वेद्यान्तरस्पर्शो न सम्भाव्यते। अस्यायमाशयः-रसस्थितौ प्रमाता स्वपरतटस्थादिभावनानिर्मुक्तो देशकालादिबन्धनानधीनःप्रस्तुतप्रसंगप्राप्तपूर्णतादात्म्यानुभवस्तत्काल सर्वथोपलब्धात्मलयो भवति। 'रसः स्वप्रकाशानन्दश्चिन्मयश्च।'

भट्टनायकोक्तिप्रयोजितेयं युक्तिः। अनयाभिप्रेयते यद् रसानुभूतिः किलात्मचैतन्यप्रकाशिताऽऽनन्दमयीचेतना-यत्रैन्द्रियानुभूतिसम्बन्धाभावविशिष्टश्चैतन्यात्मास्वादुसद्भावो जागर्ति। सत्वोद्रेकाद्रसाविर्भाव इति प्रकरणोक्तोऽयमर्थः। ततो रसानुभूतिः कश्चन स्वस्थः परिष्कृतश्चानन्दः, नासावैन्द्रियस्य विषयसुखस्य कोट्या स्पर्शनीयः।

'रसो लोकोत्तरचमत्कारप्राणः।' रसानुभवः प्रत्यक्षानुप्रत्यक्षाभ्याम्, कार्यज्ञाप्याभ्याम्, सविकल्पकनिर्विकल्पकज्ञानाभ्यांज्ञातृचेतनासद्भावविलयोपलक्षिताभ्यां विलक्षणः। इत्यमखिललौकिकपरिभाषानवच्छिन्नतया रसोऽनिर्वचनीयो लोकोत्तरो वा सिद्ध्यति। अयञ्च लोकोत्तरत्वव्यपदेशोऽत्यन्तंविवादास्पदम्, विद्यमानविचारकजनाक्षेपविषयीकृतः किलानेन रससिद्धान्तः। काव्यस्य लौकिकत्वे तदास्वादस्यालौकिकत्वं कथमिति तेषां विप्रश्नो लोकोत्तरत्वसमर्थकैस्तु समाधीयते यथा अलौकिकत्वं लोकोत्तरत्वं वा नातिप्राकृतिकत्वम्, अपि त्वतीन्द्रियत्वं नाम। इन्द्रियैरगम्यो हि तदनुभव इति। 'रसो ब्रह्मास्वादसहोदरः' तत्समान इति यावत्। विषयानन्दविलक्षणश्चिन्मयानुभवः किलायमिन्द्रियागोश्चैतन्यात्मविषयः। तथापि न शुद्धो ब्रह्मानन्दो नाप्यात्मानन्दः, ब्रह्मानन्दो हि नित्यः, अनित्यस्तु रसः। अपि चायं न सर्वथा विरोभूतलौकिकविषयः।

पण्डितराजदृशा त्रिविधानन्दः शक्यते तावदेवं व्याख्यातुम्—

विषयानन्दः—(लौकिकसुखम्) आनन्दाभासः-चैतन्याभासेनाभासितानामन्तःकरणवृत्तीनां विषयसामञ्जस्येन जायमानोऽन्तःकरणवृत्तिविशेषरूपः।

ब्रह्मानन्दः—(विशुद्ध आत्मानन्दः) निरुपाधिकचैतन्यस्वरूपानन्दः।

काव्यानन्दः--(रसः)सोपाधिकआत्मानन्दः--विशुद्धरत्याद्युपाधिनोपहितश्चैतन्याकाराकारितशि चत्तवृत्तिविशेषानन्दः।3 इत्थं काव्यानन्दब्रह्मानन्दयोरन्तरं वियते, परमसौ न प्रकृत्या, अपि तु गुणमात्रेण। काव्यानन्दब्रह्मानन्दौ किलैकस्यात्मानन्दस्य द्वौ भेदौ--काव्यानन्दे विशुद्धः साधारणीकृतो वा रत्यादिर्भूमिकां बहति। अत एव सोऽस्थायी सोपाधिकश्च। ब्रह्मानन्दे तु नैतादृशः कश्चिदपि विषयो भूमिकावहः। अत एव स स्थायी निरुपाधिकश्च। विषयानन्देऽप्यात्मतत्वमात्मपरामर्शस्याऽऽत्मास्वादस्य वा वाचकम्, परमदो विषयग्रस्तम्। प्रकृतिदोषास्तत्र वर्तन्ते। भोगस्य जडस्य वा पदार्थस्य स्थूलता तत्प्रेरितस्य भोक्तृचित्तस्य रागद्वेषौ च तत्र संलग्नौ भक्त इति स मिश्रितः। तदपेक्षया स्थूलेन मृण्मयेन (भौतिकेन) वांशेनाविष्टः। काव्यास्वादो रसो वैतदुभयमध्यवर्ती। अयं विषयानन्दापेक्षयाऽतिशुद्धश्चिन्मयश्च, अतिसूक्ष्मः परिष्कृतश्च। परं ब्रह्मानन्दापेक्षया स्थूलः।अयं सारः--रसःकाव्यास्वादः। स चास्वाद खल्वानन्दमयः, काचिदानन्दचेतनेत्यर्थः।आनन्दचेतना किलात्मसाक्षात्कारः। आत्मपरामर्श इत्यभिनवः। संविद्विश्रान्तिरिति भट्टनायकः।

अस्यां किलानन्दचेतनायां प्रायेणैन्द्रियभोगाग्रभावश्चैतन्यात्मानन्दसद्भावश्च जाग्रतः। लौकिका भावाः काव्यनिबद्धाः सन्तः स्थूलमैन्द्रियं वा रूपमसहाय सूक्ष्मीभवन्ति देशकालसीमनिर्मुक्ताः साधारणीक्रियन्ते। येन ते प्रमातृप्रत्यक्षागोचराः साधारणीकृताश्च ते स्वसंसर्गेण स्वपरतटस्थादिभावनायाव्यक्तिगतरागद्वेषाभ्यां प्रमातारं विमोचयन्ति काव्येन कविनिबद्धभावप्रभावेण वा प्रमातृजनसमासादिता संविद्विश्रान्तिरात्मपरामर्शो वा प्रायेणैन्द्रियभोगाग्रभाववान् भवति।तथाप्ययमनन्दो शुद्धात्मानन्दादभिन्नः, न ह्ययं स्थायी नाप्येकान्ततस्तिरोभूतलौकिकविषयस्पर्शः।इत्थं संस्कृतकाव्यशास्त्रप्रतिनिधीनामाचार्याणांशब्दार्थाभ्यांविशुद्धभावभूमिकायात्मचैतन्यास्वादस यैव रसत्वमभिमतम्।अद्यः चेमाः समा अपि स्थापना विवादास्पदतां गताः, अस्मिन्हि रसस्वरूपे समुत्तिष्ठते प्रश्नत्रयम्।

को नु भावानुभूतिरसानुभूत्योर्मिथः सम्बन्धः?

किं रसानुभूतेरानन्दमयचेतनात्वमपरिहार्यम्?अपरिहार्यञ्चेत् तर्हि किं स्वरूपमस्यानन्दस्येति?एतस्य प्रश्नत्रयस्य समाधानमन्तराऽऽधुनिकस्य काव्यजिज्ञासुजनस्य नास्ति परितोषः। अतोऽस्याधुनिकालोचनशास्त्रप्रकाशे विवेचनमनिवार्यम्।

को नु भावानुभूतिरसानुभूत्योर्मिथः सम्बन्धः?

नूनं रसो भावाश्रितः, भावभूमिकामन्तरा न सम्भवति सा रसस्थितिः संस्कृत काव्यशास्त्रस्यायं सर्वथा निर्भ्रान्तः सिद्धान्तः। भावस्पर्शशून्यः शब्दार्थचमत्कारो न रस इत्यत्र स्वयमलंकारवादिनोऽपि न विप्रतिपद्यन्ते। रसः काव्यात्मेत्यमन्यमाना अपि तं शब्दार्थचमत्कारैकांगमभिदधाना अपि विभावानुभावव्यभिचारिसंयोगादेव ते रसनिष्पत्तिमध्यवस्यन्ति रसस्य भावाश्रितत्वं तेषामपि सम्मतम्। अतो रसभावायोरपरिहार्योऽविच्छिन्नः सम्बन्ध इति नाट्यशास्त्रमपि प्रमाणयति--

न भावहीनोऽस्ति रसो न भावो रसवर्जितः।इति।4

परं भिद्यते रसानुभूतिर्भावानुभूतेः। कदाचिदप्यनयोरैक्यं न सम्भवति। रसाश्रयभूताः स्थायिभावाः सामान्येन द्विविधा

भवन्त्यास्वादात्-रत्युत्साहविस्मयहास्यशमानामास्वादः सुखदः, शोकक्रोधभयजुगुप्सानामास्वादश्च दुःखदो लोके। रसस्य सर्वथानन्दरूपत्वे स्वीकृते रसानुभूतिभावानुभूत्योरयं भेदः स्वतः सिद्ध्यति। करुणरसस्यानुभूतिः खल्वानन्दमयी, शोकस्य च सा दुःखमयी। बीभत्सरसोऽन्ततः सुखदचेतनात्मकः जुगुप्सा तु दुःखदा। अत्र श्रृंगारवीरहास्यादिषु सन्देग्धुं शक्यते यत् तेषां स्थायिभावानामप्यनुभूतिः सुखदा भवति। यथा लोकगतकाव्यगतयोः प्रेमप्रसंगयोर्हास्यप्रसंगयोश्चैकरूपतायां नियमेन भ्रान्तिः सम्भवति। लोकगते प्रेमपरिहासे साकेतकाव्यगते चोर्मिलालक्ष्मणपरिहासे किमस्ति कश्चन भेदः। सामान्येन नानयोः कश्चन भेदः प्रतीयते। परमत्र भेदस्तु तावदस्त्येव। लोकजीवनेऽपि वस्तुतः काव्यं तथा निविष्टं यथा तत्रैतत्सम्पृक्तैकीभूतम्, काव्यमपि सामान्यानुभवांगतां गतम्। लौकिकेषु प्रेमप्रसंगेषु हास्यप्रसंगेषु च सहजतया प्रयुज्यमानं वाग्वैग्ध्यं वस्तुतः काव्यस्यैवांगम्। भावकल्पनयोः शब्दार्थयोर्वा रमणीयं साहित्यमेव काव्यं नाम। तस्य लिपिबद्धत्वं नापरिहार्यम्। अतः प्रीतिसन्दर्भगता रमणीया उक्तयः श्रृंगाररसात्यन्तसन्निहिता भवन्ति, रमणीयोक्तेरेव काव्यत्वात्। परं तत्रापि श्रृंगाररसविशुद्धेरभाव एव। ईदृशानां प्रसंगानां व्यक्तिसीमपरिबद्धत्वात्। एतेषां ह्यालम्बनोद्दीपनस्थायिसञ्चारिभावाः सर्वेऽपि विशिष्टा असाधारणीकृताश्च। अपि चैतेषां व्यक्तिगतरागद्वेषपरिवेशितत्वात्प्रमातृचित्तमप्यत्र वीतविघ्नं न भवति, अतो नैषां रसस्थितिः। अयमानन्दः कल्पनाकमनीयभावना संयोत्प्रत्यक्षप्रेमानन्दापेक्षया श्रृंगाररसातिसन्निहितोऽपि व्यक्तिगतरागद्वेषपरिवेशितत्वात् श्रृंगाररसतां नैति। वास्तविके प्रेमप्रसंगे परिहासोक्तयः कदाचिच्चित्ते निविशन्ते, ताभिश्च रसविघातकः कटुतोदयः सम्भाव्यते। किन्तु साकेतोक्तेऽस्मिन्नूर्मिलालक्ष्मणपरिहासे न तादृशं किमप्याशङ्क्यते। अत्र च कटुता प्राविश्यापि साधारणीकृतिबलात्प्रमातृचित्तमालिन्यं न जनयति, भावप्रत्यक्षानुभवे रसे चायमेव भेदः। अत एवाभिनवादिभिः स्फुटतया रसस्य प्रत्यक्षागोचरत्वं प्रतिपादितम्।

तत्किं नाम भावपरोक्षानुभवो रसः इति शास्त्रसम्मतम्? नेत्याह। चिन्तनीयो हि नाम परोक्षानुभवपदार्थः। भावस्मृतिर्वेति पर्यायाविति मे मतम्। प्रेम्णः किल तात्कालिको भोगः प्रत्यक्षानुभवः तत्स्मृतिर्वेति परोक्षानुभवः। तत्रैष प्रश्नः, तर्हि भावस्मृतौ रसे च कथं भेदः?

'भावस्मरणं रसः।' इति तु तयोरभेदे प्रमाणम्। प्रमातुः प्रत्यक्षः प्रेमानुभवः श्रृंगाररसो न भवति। परं प्रेमानुभवस्मरणे वा काव्यनिबद्धप्रेमप्रसंगभावनाप्रेक्षणाभ्यामन्यतरेणानुभूतपूर्वप्रेमसंस्कारोद्बोधे वा श्रृंगाररसे वा कश्चभेदः?प्रश्नोऽयं द्विधा समाधीयते। प्रथमं तावत्प्रेमानुभवस्मरणेव्यक्तिसीमाभिबद्धत्वात्परिस्थिति वशोन्मिषितसुखदुःखोभयान्यतराभिनिविष्टत्वाच्च चित्तं वीतविघ्नं न भवति। सुखदा हि संयोगस्मृतिः, दुःखदा च वियोगस्मृतिः। परोक्षानुभवरूपतया स्मृतौ सुखदुःखयोस्तीव्रता नूनं किञ्चिदपकृष्यते, अनुभवात्मकता तु न परिवर्तते। रसे तु संयोगवियोगस्वादे नायं माधुर्यकाटवभेदः। अपरञ्च काव्यनिबद्धप्रेमप्रसंगभावनप्रेक्षणयोरनुभूतपूर्वप्रेमसंस्कारोद्बोधोऽपि तावदसरूपतां

नोपैति, यावद् व्यक्तिसीमानो नापयन्ति। काव्यसौन्दर्यबलात्तुच्छिन्नेषु व्यक्तिसीमासु स प्रेमसंस्कारो रसतया परिणमति। अतो भावस्मरणं रस इति न सिद्धान्तः। स्मरणस्य हि परोक्षानुभवत्वेन तत्रैन्द्रियत्वं किञ्चिदपकृष्यते, कल्पनातत्वञ्च समाविशते। अतः स्मरणं प्रत्यक्षभावानुभूतेरपेक्षया रसानुभूतेः सन्निहितं प्रतीयते न तु तदभिन्नम्। इत्थञ्चैतत्सिद्धम्--प्रत्यक्षा परोक्षा वा स्वगतभावानुभूतिर्न खलु रसः। तर्हि किं परगतभावानुभूते रसत्वं स्वीकार्यम्? इति चेत्, अवधेयम्। अभिज्ञानशाकुन्तले श्रृंगाररसो नास्माकं स्वगता प्रेमानुभूतिः, सा खलु नायिकानायकगतैव, या प्रत्यस्माकमियं प्रतिक्रिया रसो नाम। स्वगतप्रेमानुभूतिर्भावः।काव्यजनिततादात्म्येन परगतप्रेमानुभूतिस्त्वास्वाद्यमाना रसः। तत्र हि छिद्यन्ते व्यक्तिसीमानः। परमयं पक्षः सर्वत्सरसहस्रात्पूर्व भट्टनायकादिभिराचार्यैर्निरस्तः--परगतप्रेमानुभूतिं प्रत्यस्माकं प्रतिक्रियायामपि हि स्वगतरागद्वेषात्यन्तप्रबुद्धत्व रसानुभूतेर्बाधकं भवति। परगतरसचेतना चास्माकं चेतसि संकोचवैतृष्ण्यक्रोधादिभावानप्युद्बोधयितुं प्रभवति, न च रसम्। स्वगतानुभववशात्परगतानुभवस्यापि व्यक्तिसीमाभिबद्धत्वाद् रागद्वेषापरिच्छिन्नत्वं न सम्भवति। अतः परगतभावानुभूतेरपि न रसत्वम्। अयमत्र निष्कर्षः--भावाश्रितत्वेऽपि रसस्य भावानुभूतिभिन्नत्वं निर्विवादम्। प्रत्यक्षपरोक्षस्वगतपरगतसुखदुःखदा काचिदपि भावानुभूती रसानुभूतिर्नास्ति। भावानुभूतेर्ह्यमीषु समेष्वपि रूपेषु रागद्वेषसंसर्गोऽपरिहार्यः। सति चैतादृशसंसर्गे चेतसो मुक्तावस्था न सम्भवति, तामन्तरा चानन्दानुभूतिः सबाधैव भवति। अत्र कश्चिदाधुनिको जिज्ञासुः पृच्छेत्--रसस्तावद् भावाश्रितः परं भावानुभूतेर्भिन्नः इति विप्रतिषिद्धमेतत्। शास्त्रन्तु तं विप्रतिषेधं समाधत्ते न खलु व्यक्तिबद्धभावास्वादो रसः। अपि तु साधारणीकृभावास्वाद एव सः। साधारणीकृतो हि भावो निर्विषयत्वेन रागद्वेषदंशदूषितो न भवति, तेनासावानन्दमय एव भवति। स हि भावमाध्यमेन शुद्धबुद्धचेतनास्वादः सर्वथानन्दमयः। शुद्धबुद्धचेतनासवादः पुनरयं चिन्तनतोऽपि सम्भवति, परं नासौ रसः। भावमामाध्यमं विना हि न रसनिष्पत्तिः। किन्नाम रसस्यानन्दमयचेतनात्वमपरिहार्यम्?

काव्यशास्त्रीयोऽयमतिमहिमशाली विवादास्पदीभूतः प्रश्नः। रसः काव्यास्वादो वाऽऽनन्दमय इति निर्विवादम्। किन्तु तस्यानन्दमयत्वमपरिहार्यमित्यत्रनमतैक्यम्। श्रृंगारवीरहास्याद्भुतशान्तानामास्वादः स्फुटमानन्दमयः परं करुणभयानकबीभत्सादीनामास्वादस्याप्यानन्दमयत्वं विवादास्पदम्। स्वदेशे विदेशे च प्रायो रसस्यानिवार्यतयाऽपूनन्दमयत्वपक्षो बहुमतः। परं तद्विरोधिस्वरोऽपि मुखरतामदीधरत्, विशेषाद्यत्वे स वर्धते। प्रस्तुतप्रसंगे सर्वतः प्रथमं भरतमतं पर्यालोचनीयमैतिहासिकक्रमप्राप्तत्वात्। तथाहि--

'यथा हि नानाव्यञ्जनसंस्कृतमन्नं भुञ्जाना रसानास्वादयन्ति सुमनसः पुरुषा हर्षादींश्चाधिगच्छन्ति, तथा नानाभावाभिनयव्यञ्जितान् वागंगसत्वोपेतान् स्थायिभावानास्वादयन्ति सुमनसः प्रेक्षका हर्षादींश्चाधिगच्छन्ति तस्मान्नाट्यरसा इत्यभिव्याख्याताः।' इति। 5

अत्र हर्षादीत्यादि पदमाधृत्य विरोधिनो विद्वांसः सिसाधयिषन्ति यन्न केवलानन्दरूपोऽयं रसास्वादः। स्थायिभावास्वादमनु सोऽन्यथापि भवति। परमिदं कदाचित्तेषामात्मधारणा प्रक्षेपणमात्रं स्यात्, न चस्यादिदं भरताभिप्रेतम्। यथा स्वस्थाः पुरुषा व्यञ्जनसंस्कृतमन्नमास्वादयन्ति तथा प्रसन्नचेतसः प्रेक्षका अभिनयसम्पृक्तान् स्थायिभावान्। यथा चान्नभोक्तारस्ते हर्षादीननुभवन्ति तथा रसभोक्तारः प्रेक्षका अपीयास्वादस्यानुभूत्यात्मकं रूपमुभयोः समामित्यर्थः। इत्थं गते हर्षादिपदार्थः स्फुटी भवति। यथा व्यञ्जनादिसंस्कृतान्नास्वादस्य मानसिकी प्रतिक्रिया हर्षादिरूपा-हर्षोहर्षकोटिकानि वा प्रीतिकराणि विकारान्तराणि तृप्तिप्रभृतीनि भवन्ति। न तु हर्षत्तविपरीता दुःखक्षोभादयोऽप्रीतिकरा विकारास्तत्र भवन्ति न च सम्भवन्ति। तथैव रसास्वादस्याप्यनुभूत्यात्मकं रूपमानन्दमयमेव भवति, न तु दुःखक्षोभादिमयमित्यर्थः। यावदत्र प्रसंगे स्वादिष्ठस्य भोजनस्य कथमप्यप्रीतिकरत्वं नांगीक्रियते तावद्रसास्वादस्याप्रीतिकरत्वस्वीकरणं नोपपद्यते। आदिपदं भोजने रसे चेत्युभयत्र हर्ष आदिर्येषां तेषां शान्तिविस्मयादीनामेव वाचकं न क्षोभादीनाम्। अतो भरतमते रसस्य सुखदुःखोभमयाकत्वं न सिद्ध्यति न च प्रसिद्ध्यति तस्याः केवलानन्दमयतायाः प्रतिषेधः। तदीयं समस्तमपि रसविवेचनं विशेषात्तदास्वादप्रक्रियाव्याख्यानं रसस्याहूलादुकतामेव साधयति, नु तु तां बाधते लेशतोऽपि।भरतसूत्रव्याख्याताभिनवगुप्तोऽपि पुष्णातीदमेव मतम्। तथाहि—'अन्ये त्वादिशब्देन शोकादीनामत्र सङ्ग्रहः। स च न युक्तः। सामाजिकानां हि हर्षैकफलं नाट्यं न शोकादिफलम्ं तथात्वे निमित्ताभावात् तत्प्रसंगाच्च।'अत्र नाट्यस्य शोकादिफलत्वे प्रमाणं नास्ति, सति च तस्मिन् सामाजिकानां शोकाद्यनभीष्टभावोदयः स्यादितिभावः।

अभिनवविषये चाचार्यविश्वेश्वरस्येयमभिनवा स्थापना-अभिनवो रसस्य सुखदुःखोभयात्मकतां मन्यते, तन्मते प्रतिरसं सुखदुःखे अनिवार्यतया मिश्रिते भवतः। तथाहि—'भरतः—योऽयं स्वभावो लोकस्य सुखदुःखसमन्वितः।सोऽंगाद्यभिनयोपेतोनाट्यमित्यभिधीयते।6कथमिति प्रत्यक्षकल्पानुव्यवसायविषयो लोकप्रसिद्धसत्यासत्यादिविलक्षणत्वाद्यच्छवाच्यो लोकस्य सर्वस्य साधारणतया स्वत्वेन भाव्यमानश्चर्व्यमाणोऽर्थो नाट्यम्। स च सुखदुःखरूपेण विचित्रेण समनुगतो न तु तदेकात्मा। तथाहि—

रतिहासोत्साहविस्मयानां सुखस्वभावत्वम्।क्रोधभयशोकजुगुप्सानां तु दुःखरूपता।।7अनेनोद्धरणेन स्फुटमेव नाट्यरूपस्यार्थस्य स्थायिभावानाञ्च सुखदुःखोभयात्मकत्वमुपवर्णितम्। भरतेनार्थस्तत्पर्यायोनाट्यं वा सुखदुःखससन्वितत्याऽंगीक्रियते।तद्व्याचक्षाणेनाभिनवगुप्तेनरतिहासोत्साहविस्मयानां सुखप्रधानत्वम्, क्रोधभयशोकजुगुप्सानाञ्च दुःखप्रधानत्वं विवेचितम्। अभिनवस्येदं विवेचनम् वस्तुतो मार्मिकम्। तेन हि नवानामपि स्थायिभावाना प्रकृतिविश्लेषिता, साधितञ्च तेष्वष्टानामुभयात्मकत्वम्, एकस्य निर्वेदस्य च शुद्धसुखात्मकत्वम्। उभयात्मकत्वस्यायमभिप्रायो यद् रतिहासोत्साहविस्मयाः प्राधान्येन सुखमयाः सन्तोऽपि न सर्वथा दुःखेनासंस्पृष्टाः। तथा क्रोधभयशोकजुगुप्साः प्राधान्येन दुःखमया अपि नात्यन्तं सुखेनास्पृष्टा इति

शोकोऽपि नामैकान्ततो दुःखरूपोऽपि पूर्वकालिकसुखस्मृत्यनुविद्धो भवति। इदं कदाचिदन्यत्रोपयुक्तेऽवसरे चर्चयिष्यामः। अत्र तावदिदमेव विचार्यम्, यदाचार्यविश्वेश्वरेण
रतिक्रोधादीनांस्थायिभावपरकत्वमगृहणतारतिक्रोधादिस्थायिकश्रृंगाररौद्रादिरसपरकत्वं कथमंगीकृतमिति न विद्मः। नास्ति हि प्रस्तुतप्रसंगे पूर्वापरसन्दर्भे क्वचिदपीदृशो निर्देशः येनेदं साधयितुं शक्येत। यदि भरतस्य 'स्थायूयेव रसः' इत्युक्तिमनुसृत्य स्थायिरसयोरभेदः प्रतिपाद्यते तथा नेदमनवद्यम्। अभिनवो हि 'नियमेन सीायिविलक्षणो रसः' इत्यवैवास्थितः। तेन मन्महे यदभिनवः सीायिनामेव सुखदुःखस्वरूपतां मन्यते न रसानामिति स्पष्टम्। तथाहि—
'विलक्षणाकारसुखदुःखादिविचित्रवासनानुवेधोपनतहृद्यतातिशय.संविच्चर्वणात्मना भुज्यते।' इति। साङ्ख्याचार्याणां मतमपवदताभिनवेनायमर्थः स्फुटतरीकृतः—
'येन त्वभ्यधायि सुखदुःखजननशक्तियुक्ता विषयसामग्री बाह्यैव, सांख्यदृशा सुखदुःखस्वभावो रसः। तस्याश्चैव सामग्र्यां दलस्थानीया विभावाः, संस्कारका अनुभावव्यभिचारिणः। स्थायिनस्तु तत्सामग्रीजन्या आन्तराः सुखदुःखस्वभावा इति। तेन स्थायिभावान् रसमुपनेष्यामः इत्यादानुपचारमंगीकुर्वता ग्रन्थविरोधं स्वयमेव बुध्यमानेन दूषणाविस्करणमौर्ख्यात् प्रामाणिको जनः परिरक्षित इति किमस्योच्यते। यत्वन्यत् प्रतीतिवैषम्यप्रसंगादि तत्क्तियदत्रोच्यताम।' इति।
अतो नूनमियं धारणाभिनवस्य मूलसिद्धान्तमेव प्रतिरूणद्धि—
'अस्मन्मते तु संवेदनमेवानन्दघनमास्वाद्यते। तत्र का दुःखाशंका।' इति।
भारतीयकाव्यशास्त्रे किलाचार्याणां वहुमतोऽयमेव पक्षः अभिनववात्पूर्व भट्टनायकेनोत्पत्तिप्रतीत्यनुमितिप्रभृतिसि— द्धान्तान्निरस्यता ये तर्का उपस्थापितास्तेष्वयं प्रमुखः, यदि रस उत्पद्यत इति मन्यते तदा शोकाच्छोक एवोत्पद्येत, शोकाद्यभिनयं पश्यतः सामाजिकस्य च दुःखमेव स्यात्, अर्थात् करुणरसस्यास्वादो दुःखमय एव स्यात्।
'रसो न प्रतीयते नोत्पद्यते नाभिव्यज्यते। स्वगतत्वेन हि प्रतीतौ करुणे दुःखित्वं स्यात्। न च सा प्रतीतिर्युक्ता। सीतादेरविभावत्वात्। स्वकान्तादिस्मृत्यसंवेदनात् (अभिनयकाले इत्यर्थः)।'8
इत्थं भट्टनायकस्याभिमतां करुणरसस्य दुःखमयतां प्रतिषिध्य रसमात्रस्याऽऽनन्दमयताऽतर्क्यतया प्रतिष्ठापिताभिनवगुप्तेन।
मम्मटेन रस एव सकलप्रयोजनमौलिभूतस्तदास्वादश्चानन्दमय इति प्रतिपादितम्—'सकलप्रयोजनमौलिभूत समनन्तरमेव रसास्वादनसमुद्भूतं विगलितवेद्यान्तरमानन्दम्' इति काव्यं करोतीति शेषः।9
अपरत्र दशरूपकटीकाकृद्धनिकः केनापि विलक्षणेन दृष्टान्तेन रसमात्रस्य सुखरूपतामसाधयत्। रसावादिनो विश्वनाथस्य तु मतं सर्वथैव निर्भ्रान्तम्—करुणादावपि रसे जायते यत्परं सुखम्।
सचेतसामनुभवः प्रमाणं तत्र केवलम्।।10किञ्च तेषु यदा दुःखं न कोऽपिस्यात्तदुन्मुखः। तथा रामायणादीनां भविता दुःखहेतुता।।इति।।
अन्ते च पण्डितराजजगन्नाथस्य मतम्—

'स्वप्रकाशतया वास्तवेन निजस्वरूपानन्देन सह गोचरीक्रियमाणः............रत्यादिरेव रसः।' इति। 'रत्यादयः स्थायिभावा एव सत्यज्ञानानन्तात्मतया स्वतः प्रकाशमानेनात्मानन्देन सहानुभूयमाना रसतया परिणमन्ति—
'रसो वै सः रसं ह्येवायं लब्ध्वाऽऽनन्दीभवति। इत्यादिश्रुतिः सकलसहृदय प्रत्यक्ष चेति प्रमाणद्वयम्''सत्यम्, शृंगारप्रधानकाव्येभ्य इव करुणप्रधानकाव्येभ्योऽपि यदि केवलाह्लाद एव सहृदयसहृदयप्रमाणकः, तदाकार्यानुरोधेनकारणस्याकल्पनीयत्वाल्लोकोत्तरव्यापारस्यैवाह्लादप्रयोजकत्वमिव, दुःखप्रतिबन्धकत्वमपि कल्पनीयम्।''अथ तत्र कवीनां कर्तुं सहृदयानां च श्रोतुं कथं प्रवृत्तिः? अनिष्टसाधनत्वेन निवृत्तेरुचितत्वादिति चेदित्यादि।' इत्थं सर्वेऽपि संस्कृतसाहित्यप्रतिनिधिभूता आचार्या रसस्यानन्दमयत्वमपरिहार्यमाहुः। विपक्षयोस्तु जैनाचार्ययो रामचन्द्रगुणचन्द्रयोः स्वरस्तारतरः स्फुटतरश्चश्रूयते—'सुखदुःखात्मको रसः।' इति।
तत्रेष्टविभावादिप्रकाशितस्वरूपसम्पत्तयः शृंगारहास्य- वीराद्भुतशान्ताश्चत्वारः सुखमयाअनिष्टविभावादिसमासादितस्वरूपाःकरुणरौद्रबीभत्सभयानकाश्चत्वारश्च दुःखमया रसा भवन्तीति।

एतयोः सर्वेषां रसानां सुखात्मकत्वं कदाचिदपि नाभिमतम्—यदिदं सर्वेषां रसानां सुखमयत्वमुच्यते तत्प्रतीतिपिरीतम्। मुख्यविभावाद्युत्पन्नकरुणादिरसानां दुःखमयतायाः का कथा? काव्याभिनयप्राप्तकृत्रिमविभावाद्युत्पन्नभयानकबीभत्सकरुणरौद्रा रसा अपि प्रमातॄणां काञ्चिदवर्णनीयां क्लेशदशामुपजनयन्ति। अतो भयानकादिभ्यः सामाजिका उद्विजन्ते, न खलु सुखास्वादात्कस्यचिदुद्वेगः श्रुतो दृष्टो वा।
संस्कृतकाव्याशास्त्रस्येतिहासे रसस्यानन्दमयताया एव स्फुटो विरोधो नान्यत्रवलोक्यते। रुद्रभट्टेन स्वकीयायारसकलिकायामेकत्र रसस्योभयात्मकत्वं निरुपितम्—
'करुणाभयानामप्युपादयत्वं सामाजिकानाम् रसस्य सुखदुःखात्मकतया तदुभयलक्षणत्वेनोपपद्यते।' इति। अस्मिन् पक्षे केचिदन्येऽप्याचार्या नामतो ग्राह्या भवन्ति यथा भट्टलोल्लटः। अभिनवभारत्यामुल्लिखितः सांख्याचार्यो वा। ये रसस्य स्थायिभावापचित्तरूपताभिमानवशादवश्यं सुखदुःखात्मकत्वमंगीकुर्वन्ति। परमुल्लेखमात्रमिदम्। न खल्वेतैरस्मदीयं शास्त्रीयं चिन्तनं विशेषात्प्रभावितम्। संस्कृतकाव्यशास्त्रपरम्परेयं क्रमादाधुनिकीषु भारतीयासु भाषास्ववतीर्णा, हिन्दीमाहाराष्ट्रयोश्चास्या विशेषेण विकासविस्तरौ जातौ। तत्र हिन्दीकाव्यशास्त्रपरम्परा तु मध्ययुगादेवोपाक्रामत्, तस्याञ्च रससम्बद्धं बृहद वाङ्मयमुपलभ्यते। रीतिकालिकैरनेकैः सामर्थ्यशालिभिः कविभिराचार्ये रससिद्धान्तो विभुतया विवेचितः। परमिदं विवेचनं कात्स्न्येन संस्कृतकाव्यशास्त्रमेवाश्रितम्। रीतिकालिका हि सर्वेऽप्याचार्या रसस्यालौकिकतामानन्दरूपतां, ब्रह्मास्वादसहोदरतांचपुनरावर्तयन्। तथाहि—नाट्यप्रेक्षणकाव्यश्रवणाभ्यामावरणभंगे। आनन्दात्मा चिदियं रसरूपेण प्रकाशते सद्यः। ब्रह्मास्वादे यत् स्यात्सुखमतियातेतरावबोधानाम्। सा गतिरत्र रसे स्यान्मग्नानां नवविधेऽप्यन्तः।। इति। तेषां विषये तेषां समक्षं नूनं नासीदन्योऽपि विकल्पः।

आधुनिकाः आलोचका अपि बहुधैतदेव मन्यन्ते। आचार्यकेशवप्रसादमिश्र-पण्डितरामदहिनमिश्र-डाक्टरभगवानदास–डाक्टरश्यामसुन्दरदास–डाक्टरगुलाबरायाचार्यहजारीप्रसादद्विवेदिनः सर्वेऽप्यमयी रसस्यानन्दस्वरूपतां मन्यते। नूतनज्ञानविज्ञानप्रकाशेऽमीभिस्तस्य लोकोत्तरत्वमानन्दमयत्वञ्च प्रातिस्विकशैल्या व्याख्यातम्, अत्र केवलमाचार्यो रामचन्द्रशुक्ल एव प्रबलोऽपवादः, भारतीयशास्त्रपरम्परया विशेषाद्रसवादस्यातिसमर्थेन समर्थकेनाप्यनेन रसस्यानन्दरूपता स्फुटं विरोधिता। तथाहि–

'यदि सामाजिकहृदयेऽपि प्रदर्श्यमानो भावो नोदेतिः तस्य भावस्य स्वानुभूतिविलक्षणप्रकारकः कश्चिदानन्दोऽनुभूतः तदा कीदृशमिदं साधारणीकरणं स्यात्? क्रोधशोकजुगुप्सादिव्यञ्जकान्यपि वर्णनानि यदि श्रोतृहृदयान्तरानन्दमेव सञ्चारयेयुस्तदा श्रोतुरसहृदयता वा कवेरनुभूतभावप्रदर्शनजनितमपाटवं वा तत्र प्रतीयेत।

मम मते तु रसास्वादस्य प्रस्तुतं स्वरूपमानन्दशब्देन न व्यज्यते। लोकोत्तरानिर्वचनीयादिविशेषणैश्च तस्यावाच्यत्वं न निवार्यते। नापि प्रयोगायोग्यत्वम्। अपिनाम क्रोधशोकजुगुप्सादयोऽत्यन्तविसृष्टनिजाकाराःस्वस्वरूपा स्पर्शशून्याः सन्तः आनन्दात्मतयैव श्रोतुरन्तः प्रकाशन्ते। किन्नाम विभावत्वं तेषां स्वरूपमपहृत्यैकमात्रसुखस्वरूपे परिणमयति। किमु तेषां दुःखभेदा अपि सुखभेदतया प्रतीतिपथमवतरन्ति। किमु मृतं पुत्रं पुरस्कृत्य विलपन्तीं शैब्यां शववस्त्रं याचमानस्य हरिश्चन्द्रस्य दर्शनश्रवणाभ्यां श्रोतृणामश्रूणिन प्रवर्तन्ते, किं नाम ते तत्र हसन्तो दन्तान् दर्शयन्ति। किं नाम महमूदकृतानत्याचारानाकर्णयतां पठतां वा चेतसि नायाति तं धूलिमदं मदयितुं विचारः। किं पठितदुःखान्तकथानां चेतश्चिरं काचिद् व्यथा नास्कन्दति। चित्तस्येयं द्रुतिः किमानन्दकृता? वस्तुतोऽनेनाऽऽनन्दशब्देन काव्यमहिमा भूयोऽपकर्ष नीतः, काव्यं नृत्यकौतुककल्पतां लम्भितम्।

अहं मन्ये, नूनमानन्दसिद्धान्तेऽसौ निर्मम्तमः प्रहारः। यत्र जैनाचार्यकृतः प्रतिवादः कोमलतरः प्रतीयते। तथापि नैतावता समाहितोऽयं प्रश्नः।

सत्यहरिश्चन्द्रोप्रेक्षणे प्रेक्षकस्य दन्तप्रकाशनं नेष्टमिति परमार्थः। परं किमसौ वाष्पाम्बुवर्षणाय तत्र समयं धनं च व्येति। नासीत्खल्वेकांगिनी श्रीशुक्लदृष्टिः। इयं हि शंका तन्मनस्यपि जागरितासीत्, अत एव स्वप्रतिज्ञासिद्धये तेन रसस्वरूपं स्वमतानुरूपं नवीनतया व्याख्यातम्–'यथात्मनो मुक्तावस्था ज्ञानदशेति व्यपदिश्यते तथा हृदयस्य मुक्तावस्था रसदशेति।' अयमाशयः–रसदशायां स्वास्तित्वभावनापह्निूयते। काव्ये हि वयं प्रस्तुतं विषयं स्वसम्बद्धतया न पश्यामः, स्वयोगक्षेमवासनोपाधिवासितेन हृदयेन न गृहणमः, अपि तु निर्विशेषेण शुद्धेन मुक्तेन च हृदयेन। इदमेव पाश्चात्यसमीक्षपद्धत्याऽहंभावविसर्जनं निःसंगत्वं वा प्रदिश्यते। इदमेव रसस्य लोकोत्तरत्वं, ब्रह्मानन्दसहोदरत्वं वा कथ्येत विभावनव्यापारस्य वाऽलौकिकत्वम्।

इत्थमाचार्यशुक्लो रसस्यानन्दरूपतां न मन्यते, न च तत्रासावस्मितया भोगम् अपि तु विसर्जनं पश्यति। तन्मते, रसः प्रकृतभावान्मूलतोऽभिन्नोऽपि परिणामतो

भिन्नो भवति। प्रकृतस्य हि भावस्य समान्येनानुभवः सुखदुःखात्मकः, रसस्य तु श्रृंगारस्य वा स्यात्करुणस्य वा सुखदुःखाभ्यामुदात्ततरोऽवदाततरश्च भवति। इति। महाराष्ट्रया अप्यालोचकाः काव्यशास्त्रविषयेऽतिप्रबुद्धाः सन्ति। रससिद्धान्तस्य विविधेषु पक्षेषु स्वतन्त्रञ्च चिन्तनं प्रास्तुवन्। तेषामपि रसस्यानन्दात्मकत्वपक्षो बहुमतः। तेषु द० के० केलकरेण रसध्वनिवादिनामाचार्याणामभिमतं रसस्यानन्दमयत्वं प्रतिपादितम्। रसस्वरूपविवेचने रसः—आस्वादः—आनन्दः—इति समीकरणं विशेषात्समर्थितम्। काव्येन सहृदयहृदयसागर उल्लसति। अस्मिन्नुल्लसित हृदयसागरे यदा सहृदयो निमग्नस्तन्मयो वा भवति तदा तस्य तदाकारयां कृतौ निहित एवं संस्कृतसाहित्यकोविदे रसत्वेनोपदर्शितः।

द्राक्तरवाटवेरपि स्वकीये रसविमर्शे प्रस्तुतं प्रसंग विस्तरेण विविच्य रसस्य सहृदयनिष्ठतामाह्लादमयताञ्चाप्यमन्यत।

कल्पनासाहाय्येनोपलब्धः किलाह्लादकोऽनुभव एव रसः। रसस्यास्य प्रसवित्री मूलसामग्री काव्य एव भवन्ति। अर्थादर्थान्तरेण रसः कारणरूपेण काव्येऽपि तिष्ठति।

'काव्ये किलात्कटभावनाललिताविष्कारेण सहृदयपाठकसुखसंवेदिनी समग्रप्रत्युत्तरात्मिका क्रिया रसनाम्ना व्यपदिश्यते।ग० त्र्यं० देशपाण्डेरपि समार्थितन्मतमिदम्। संस्कृतकाव्यशास्त्रे रसस्वरूपविषये मिथो भिन्ने द्वे धारणे स्तः। 'स्थाय्येव रस' इत्येका 'स्थायिविलक्षणो रस' इति द्वितीया। श्रीदेशपाण्डेरनयोः समीकरणे समीचीनतां न मन्यते। अत्र हि प्रथमतया रसो भावरूपतया सुखदुःखात्मकः, द्वितीयया चानन्दात्मकः। अभिनवादिप्रतिपादित एवा— नन्दपक्षस्तस्याभिमतः—

'यावदस्मन्मतं जिज्ञास्यते। अस्माक त्वभिनवाभिमत एव पक्षः कारणवाहुल्येन स्वीकार्यः प्रतिभाति। अनेन हि सिद्धान्तेन समेषाकाव्यांगानामुपयुक्तोपपत्तिः सम्भवति, अपरिहार्यतयाऽऽनन्दवाद एवास्माकं ग्राह्यः प्रतीयत इति निष्कर्षः।महाराष्ट्र्यास्तु स्वतन्त्रचेतोभिरालोचकैर्धारणाशोधनेऽपि प्रयत्नः समदृतः। रा० श्री० जोगो रसस्यानुकूलसंवेदनारूपतां निरूपयन्नपि करुणरसानुभूतिं केवलसुखात्मिकां न स्वीकरोति। तथाहि—'काव्याध्ययने पाठकस्य वैयक्तिकः स्वार्थो न युज्यते, अतस्तस्मिन् दुःखमपि न भवति। एतावतैव चैतन्मन्तुं न शक्यते यत् सहृदयस्य समस्ता रजस्तमोमय्युयोवासना विनश्यन्ति, सत्वोद्रेकमात्रं चावशिष्यते। भावनानुगुणा हि रसात्पत्तिरिति सात्विकत्रिगुणत्वैव स्यात्। पाठकस्य वैयक्तिकस्वार्थाभावेन तु रजस्तमसोरनाविष्कारेणेमेगुणाः सुखसीमन्येव विवर्तन्ते इति।श्रीजोगस्येदं मतमाचार्यशुक्लकृतस्थापनायां सन्निहितम्। श्रीजोगोऽपि रसदशां हृदयस्ये मुक्तावस्थामिव मन्यते, परं स्वमतस्फुटीकरणे तस्य तादृशं पाटवं न दृश्यते।

हिन्दीमाहाराष्ट्रीभ्यामितराऽस्मदीया तृतीया भाषा बंगभाषाऽस्ति। यस्यामाधुनिकैर्मनीषिभिः काव्यस्य मूलतत्वानि गंभीरं चिन्तितानि। बंगभाषायां आलोचका अप्यानन्दपक्षमेव बहुमन्यते। अतुलचन्द्रगुप्तेन काव्यजिज्ञासायां भारतीयकाव्यशास्त्रीया प्राचीनपरम्परैवानुमोदिताऽस्मिन् सन्दर्भे।स्वप्रतिभामायाबलेन लौकिकशोकतत्कारणयोरलोकिकं चित्रं स्वकाव्यान्तः प्रस्फोटितवति कवौ,

पाठकमनसि समुदितो रसः करुणरसनाम्ना प्रसिद्ध्यति। नायं शोकपरिणामः, शोको हि दुःखजनकः, परं कवेः काव्यं मनसि यं करुणरसं सञ्चारयति स नयनवाष्पानयनप्रवणोऽपि मनसः किमप्यपूर्वमानन्दं वितरति। इति काव्यरसज्ञ एव जानाति। प्रमाणयितुं तु दुष्करमेव। यतः–करुणादावपि रसे जायते यत्परं सुखम्। सचेतसामनुभवः प्रमाणं तत्र केवलम्।।इति।।

रसस्य मानसिकमुपादानं भावो भवतु नाम दुःखमयः, तत्परिणामो रसस्तु नित्यानन्दहेतुरेव।कवीन्द्ररवीन्द्रदर्शनन्तु स्फुटमानन्दस्यैव दर्शनम्–

रसमात्रे सर्वविधे हृदयबोधे वा विशेषण वयमात्मानं परिचिनुमः, अस्मिन् परिचय एव कश्चिदानन्दविशेषः। दुःखाभिज्ञतयाऽस्माकं चेतना तावदालोड्यते। दुःखस्य कटुनास्वादेन नयनाभ्यां वाष्पाम्बूद्गिरति, परमिदमुपादेयम्। दुःखानुभूतिः प्रबलतरा सहजाऽऽरामबोधादपि। इदमेव दुःखमूल्यम्। कैकेयीप्ररोचनया रामबनवासः, मन्थरायाउल्लासः, दशरथस्य स्वर्गवास इत्येतेषु किमपि शोभनं नास्ति। सहजया भाषाया यत्सुन्दरमित्युच्यते, नेयं तत्कोटिगा घटनेति मन्तव्यमेव। तथापि घटनामिमामधिकृत्य कियन्ति काव्यानि, चित्राणि, गीतानि, कथागीतानि वा प्रणीतानि, कियान् सम्मर्दोजातः। सर्वैरप्यानन्दोऽधिगतः। अत्रैव हि विद्यते वेगवत्याभिज्ञतया युक्ताया व्यक्तेः प्रबलाऽऽत्मानुभूतिः। बद्धं जलं यथा मूकम्, उद्विग्नं वातावरणं यथात्मपरिचयहीनं, तथा प्रात्यहिकाभ्यासावृत्तिश्चेतनां नाहन्ति, तेनास्मदस्तिता निस्तेजस्केव तिष्ठति। अत एव दुःखे विपदि, विद्रोहे, विप्लवे मानवोऽप्रकाशावेशमुन्मूल्यात्मानं प्रबलावेगेनानुभवितुमिच्छति।दुःखस्य तीव्रोपलब्धिरानन्दकरी, सा हि निविडास्मित्वं सूचयति। केवलमनिष्टाशंका समेत्य बाधते। निर्गतायामाशंकायां दुःखं सुन्दरमेव वदिष्यामि। दुःखं ह्यस्मान् स्फुटीकरोति, आत्मानमस्फुटीभवितुमवसरं न ददाति। गम्भीरं दुःखं भूमैव, दुःखदशायां तद्भूमैव, स भूमा वै सुखम्।इत्थंरवीन्द्रमतेन काव्यनिबद्धं दुःखं व्यक्तिभावानानिर्मुक्ततयाऽनिष्टशंकात्यन्तराहित्येन चात्मलाभस्य प्रबलसाधनत्वेनानन्दयति।

बंगभाषायाः प्रसिद्ध आलोचको मोहितलालमजूमदारः स्वकीये बंगलासाहित्ये ट्रजेडीति शीर्षके लेखे, 'योरोपीयकाव्यकला यथा मां मोहयति न तथा भारतीयं साहित्यम् इति स्वीकुर्वन्नपि पर्यन्ततस्त्रासदायाः (दुःखान्तकथायाः) रसो न भारतीयहिन्दूसाहित्यरस इति निरणैषीत्। वयं जीवन न खल्वीदृशस्य रसस्य प्रश्रयं प्रदद्नः, इयं हि दुःखपूजा। भारतीयसाहित्यरसविषये स. मन्यतेभारतीयजीवनदर्शनं स्वतन्त्रम्। तत्र रसोऽपि तत्तत्वास्वादः, येनकायमनोबन्धप्रतिबन्धपूर्वकं किञ्चिदपूर्वं मुक्तिसुखमुदयते। अस्यायमाशयः. भारतीयो रसः कायमनसंवेदनातिगः खल्वात्ममुक्तिसुखानुभव इति मजूमदारमतम्। त्रासदायामपि रसोऽस्ति, दुःखाश्रितत्वात् अनित्याधृतत्वाद्वा तत्र तथा पूर्णत्वमखण्डत्वं न भवति यथा भारतीयरसे।

# ग-रसस्यमनोवैज्ञानिकं स्वरूपम्----

पाश्चात्यकाव्यशास्त्रे रसविवेचनप्रश्नोऽपि नोदेति। तु काव्यास्वादः एव रसः तदा तत्रत्यानां पूर्वाचार्याणामपि काव्यास्वादस्यानन्दमयत्वमेव बहुमतम्। सर्वतः प्रथमं तावत् प्लेटोर्विचार्यताम्। अयमानन्दंद्विविधमाह.प्रथमो विशुद्धानन्दः-आत्मसमाहित्युनुभवात्मकः(यस्मिन्आत्मसामञ्जस्यम्-पुण्यम्-सौन्दर्यम्-आनन्दः )द्वितीयश्चभौतिकानन्दः-ऐन्द्रियसुखापरपर्यायाः। प्लेटोश्चेदमभियुनक्ति यत्काव्यादात्मसामञ्जस्यं (भट्टनायकाभिमतात्मविश्रान्तिसन्निहितं तत्वम्) नोपलभ्यते, अपि त्वैन्द्रियमेव सुखम्। यदि कश्चिदस्य प्रीतिकरत्वेन सह श्रेयस्करत्वमपि साधयेत्,तदायमस्माकं लाभ एव स्यादिति। अत्र चायं सर्वथा निर्भ्रान्तो यथा काव्यस्य कामदात्रासदादिकानि सर्वाण्यपि रूपाणि, नूनमाह्लादमयास्वादभाजि भवन्तीति।

कलिक्लेशः निश्चितमतिः-स सोक्तेतसं सम्बोधयति यथा त्रासदापि प्रेक्षकाणामाह्लादादपरितोषप्रदानोन्मुखी भवतीति।

अरस्तूरपि स्वग्रन्थे काव्यास्वादप्रसंगे पौनः पुन्येन आह्लादशब्दं प्रयुङ्क्ते अनुकृतवस्तुजोऽप्यानन्दः सार्वभौमादन्यूनः, अनुभवस्तत्र प्रमाणम्। येषां प्रत्यक्षदर्शनेन वयं क्लिश्यामस्तेषांयथार्थप्रतिकृतिभावनया वयं हृष्यामः। अत्रातिजघन्यस्य पशोः शवस्य वा रूपाकृतिः सूदाहरेति काव्यशास्त्रे। अत्रानुकृतवस्तुपदं कलाकृतिपरम्। अरस्तूर्मन्यतेऽत्यन्तजघन्यविषयाया अपि कलाकृतेर्भावनमसंशयमाह्लादकं भवति। त्रासकरुणावेगैरोतप्रोतायास्त्रासदया आस्वादोऽपि कथं प्रीतिकर एव भवति न त्रासदी दुःखदो वेत्यस्य विवादग्रस्तस्य प्रश्नस्य समाधानायैवानेन विरेचनसिद्धान्तः प्रतिष्ठापितः प्रतिपादितो वा। प्रसंगेऽस्मिस्तथ्यद्वयं विमृश्यम्—प्रथमन्तावदादिमोद्धरणे यः काव्यजन्याह्लादश्चर्चितस्तत्र रागतत्वात्कल्पनातत्वं प्रधानं, रागतत्वं पुनरनुपेक्षणीयमपि न तथास्त्यपेक्षितम्, यथा तद्रसेऽपरिहार्यम्। द्वितीयञ्च त्रासदास्वादेऽपि भावविरेचनं तज्जन्यं चित्तवैशद्यञ्च मन्यते, न खल्विह विशुद्धभावभूमिकायामात्मभोगपरिक्लृप्तिः। अत्र निहितानन्दकल्पना प्रायेणाभावात्मिकेत्याशयः। परमयं सूक्ष्मो भेदः। मूलतस्तु अरस्तूः कलायाः काव्यस्य चास्वादं प्रीतिकरमेव मन्यते इति निश्चितम्।

अरस्तूतः परं पाश्चात्यकाव्यशास्त्रे प्रमुखप्रकाशस्तम्भायमानः लॉगिनुसो मुक्तभावेनानन्दवादी वर्तते। स खल्वौदात्यं काव्यप्राणतया, औदात्यस्य मूलतत्वेषु चात्मोल्लासं प्रमुखतया प्रतिष्ठापयति। तथा भूततत्वेयं नात्महर्षोल्लासाभ्यां परिपूर्यते सामान्येनौदात्यस्य तेषामेवोदाहरणानां श्रेष्ठत्वं च तन्मते माननीयतामर्हति, यानि सर्वा व्यक्तीः सर्वदाऽऽनन्दयन्ति। आत्मोल्लास एव काव्यास्वादस्वरूपमिति लांगिनुसमतसारः। तत्परवर्तिनोऽप्यालोचकाः प्रायः काव्यास्वादस्याह्लादरूपतां मत्वा प्रवृत्ताः। काव्यप्रयोजने तु तेषां मतभेदः। यत्र

कश्चिद् आह्लादपक्षीयः, कश्चिच्च लोककल्याणपक्षीयः। तत्र ये समालोचकाः आह्लादं काव्यस्य प्रयोजनं सिद्धिं वा मन्यन्ते यथा विक्टरह्यूगोशिलर-कालरिज-वर्ड्सवर्थ-शैलेयादयः, तेषां मतमत्र सर्वथा निर्भ्रान्तमेव यथा काव्यास्वादोऽयमाह्लादरूप इति। ये पुनर्लोककल्याणं साध्यं मन्यन्ते, नैतिकेषु सांस्कृतिकेषु साधनत्वेन स्वीकुर्वन्ति न साध्यत्वेन, होरेसब्युअलोरेपिनरस्किनमैथ्यूआर्नल्डप्रभृतयः। तोल्स्तोयस्तु स्फुटतयाऽऽनन्दसौन्दर्यं प्रतिवदति-अन्ततः कला नानन्दः, अपि तु मानवैकतासाधनम्। या प्रतिमानवं सहानुभूत्या मिथः सम्बन्धाति। वस्तुतः पाश्चात्यालोचनाशास्त्रे समुपक्रमादेव काव्यास्वादस्वरूपविमर्शं प्रति तथाऽऽग्रहः, यथा भारतीये। परिणामतोऽयं विमार्शो न तावद् व्यवस्थितुः, नापि तावत्सूक्ष्मगम्भीर एव। विंश्यां शताब्द्यां मनोविज्ञानस्य साहित्ये साहित्यशास्त्रे च प्रवेशे प्रसंगोऽयं स्वभावादुल्लसितः। डाक्टररिचर्ड्सप्रभृतयश्च काव्यानुभूतेः सूक्ष्मं मनोवैज्ञानिकं च विश्लेषणं प्रास्तुवन्।'ये विवेकशीलास्ते त्रासदाप्रेक्षणं न तु मनोरञ्जनार्थं, नापि च शिक्षार्थं विदध्यति' इत्यत्रारस्तूवचनं प्रमाणम्। मनोरञ्जनशिक्षे—द्वयोरेकं किमपि-यावत्सर्वथा प्रचलितार्थभिन्नेऽर्थे न प्रयुज्यते, तावद्भव्यतरकलारूपानुरूपं न भवति। कलाभव्यतररूपप्रेरितानुभवास्तथा पूर्णास्तथा विविधास्तथा चाखण्डा भवन्ति, यथा तेषु मिथोविरोधिनीनां प्रवृत्तीनां करुणात्रासमुखनैराश्यप्रभृतीनामेतावत्सूक्ष्मं सन्तुलनं जायते यदेकेन केनापि प्रचलितेन शब्देन तासां सुबोध्यत्वं न सम्भवति।
त्रासदानुभूतिर्मानवचेतनायास्तथोदात्ता प्रक्रियाय। नत्वेषां मनोरञ्जनस्य नाप्याह्लादस्य कोटौ निवेश्या न चाप्येषा स्थूलमूल्यप्रतिष्ठापनमाध्यमतया स्वीकार्या भवति, यानि नीतिसंहितायां सूत्रयितुं शक्येरन्।
रिचर्ड्सानुमत्याकाव्यानुभूतिर्नाह्लादरूपा,तस्यामिथोविरोधिनीनामन्तः-करणवृत्तीनां सूक्ष्मसंतुलनं तच्चाह्लादापेक्षया वैविध्येन पूर्णतरम्, परिपूर्णमुदात्तं च भवति।एतेषां मन्तव्यानां मननेनैष निष्कर्षः प्राप्यते—रस आनन्दरूपः। तस्य द्वे रूपे उदात्तात्मविश्रान्तिः आह्लादो वा मनः प्रीतिश्च ('सहृदयमनः प्रीतये' इत्याद्युक्ता) आनन्दस्य तृतीयमप्यस्ति रूपं मनोरञ्जनं नाम, यच्च 'एण्टरटेनमेंट' पर्यायतया प्रयुज्यते काव्येन कलया चास्य शाश्वतः सम्बन्धः। एतेषु त्रिष्वपि तद्रूपेषु प्रीतितत्वं सामान्यम्। रसो हि नामोदात्तात्मविश्रान्तिरूपोऽस्तु, आह्लादान्तश्चमत्कारादिपर्यायमनः प्रीतिरूपोऽस्तु निम्नतरे स्तरे मनोरञ्जनरूपो वास्तु, प्रतितिष्ठिति स प्रीतिकरःसुखात्मकोवास्त्येवेत्येकः।रसः सुखात्मकोऽप्यस्तिदुःखात्मकोऽपि-प्रीतिकरान् स्थायिभावानाश्रितानां शृंगारवीरशान्तादीनां स्वरूपं सुखात्मकं, अप्रीतिकरान्, स्थायिभावाश्रितानां करुणभयानकबीभत्सादीनां स्वरूपं च दुःखात्मकमिति द्वितीयः।
रसः खलूभयात्मकः, स हि सुखदुःखमयी मिश्रितानुभूतिः। प्रतिस्थायिभावं सुखदुःखे विभिन्नानुपातेन मिश्रिते भवतः। यन्मिश्रणं तदाश्रितेषु रसेष्वपि प्रतिफलतीति तृतीयः।?रसो न सुखात्मको नापि दुःखात्मकः। रसदशा हृदयस्य मुक्तावस्थाया नाम। यत्र वैयक्तिकौ रागद्वेषौ तत्परिणती सुखदुःखे च सर्वथा निश्शेषतामुपेतः, रसस्यानुभूतिश्चित्तवैशद्यस्य, विशिष्टायाः, शान्तेर्वानभूतिरस्तीति चतुर्थः।

रसः काव्यास्वादो वा न सरलानुभूतिः, तस्यामनेकेषां मिथोविरोधिनामन्तः-करणवृत्तिविशेषणां सूक्ष्मं सन्तुलनं जायते, अतः साऽत्यन्तवैविध्यपूर्णेति पञ्चमः।तथ्यप्राप्तये पञ्चानाममीषां विकल्पानां परीक्षापेक्ष्यते। नानाकारणवशाद् द्वितीयविकल्पादारम्भोऽत्युपयुज्यते। रसः सुखात्मकोऽप्यस्ति दुःखात्मकोऽपीति। सामान्येनेयमस्माकं प्राथमिकी प्रतिक्रिया यत् करुणभायानकादिकानां काव्यप्रसंगानामास्वादेन तदाधारभूतस्थायिभावानुरूपतया दुःखमयेन भवितव्यम्। परमतो विरुद्धाः काश्चिद् व्यावहारिक्यः शंका उद्यन्ति। दुःखमनुभवितुं कोऽपि मनीषी काव्यमनने नाट्यप्रेक्षणे वा कथं प्रवर्तेत। अनिवार्यं जीवने दुःखमिति मानवो दुःखं भुङ्क्ते स्वप्रयत्नबलात ततो लाममप्यन्विष्यन्ति, यथा तत्साम्मख्यायात्मबलं विकासयति, चित्तशुद्धादिकं चानुभवति, सहानुभूत्यादिभावनाः पोषयति, सखञ्चातिसुखमयं कर्तुमपि दुःखमप्युङ्क्ते। परमयी सर्वेऽपि सुखानुसन्धानस्यैव विधयः। नैतैः सिद्ध्यति। दुःखकाम्यत्वम्। न खल्विच्छया उत्साहेन वा दुःखवरणं प्रसिद्ध्यति। दुःखमार्यसत्यमितिब्रुवन्ति दर्शनान्यपि तदत्यन्तनिवृत्तिमेव परमपुरूषार्थपदेऽभिषेचयन्ति। दुःखबलिवेदिसमर्पिपिषतात्मानो भक्ताः सन्तोऽपि प्रकारान्तरेण प्रभुनामस्मरणसुखसाधनयैव दुःखमाद्रियन्ते। अयमाशयोः यदिह दार्शनिकदृशाः दुःखस्य कियदपि माहात्म्यं प्रतिपाद्यताम्, न तदन्तिमभोग्यतयाभ्युपगम्यते, अतो दुःखाय दुःखावाहनं तत्वदृष्टयापि न सिद्ध्यति, पुनुश्च साधारणः सहृदयस्तु न दार्शनिको भवति, नापि स रहस्यवादी सन् साधुः। तस्य हि सहृदयत्वं सामान्येन सवापनायां मानवतायामेव निहितम्। अतो दुःखं प्रत्यनुरज्य तज्जन्यलाभार्थं सहृदयः करुणभयानकादिप्रसंगानां कटुरसं गृहणातीति कल्पना लोकानुभवविरुद्धतया खल्वसिद्धैव। प्रस्तुतसिद्धान्तप्रवर्त्तकाभ्यां रामचन्द्रगुणचन्द्राभ्यामयं प्रश्नस्वावदित्थं समाहितः—करुणादिरसानुभवः प्रमातुर्दुःखमय एव, तथापि कविकौशलनपटपाटजनिचमत्कारं प्रत्याकृष्य नाट्यप्रेक्षणे स प्रवर्तते। एवं विधकाव्यनाट्यप्रसंगाप्राप्त आह्लादो न रसः,अपितु स कविकौशलनटपाटतजन्यचमत्कारमात्रम्। येन प्रमातुः काव्यनाट्यरसास्वादेऽपि भवत्याह्लादभ्रमः। अस्मिंश्चस्पष्टीकरणे स्वीकृते काव्यकलाचमत्कारे रसास्वादे च विच्छेदः स्फुटीभवति, उभयोश्च पृथक्स्थितिर्बाध्यतया माननीया भवति। या प्राचीने काव्यशास्त्रे आधुनिके मनोविज्ञाने चेत्युभयत्राग्राह्यतां भजते। कारणन्तु स्पष्टमेव-प्राचीनकाव्यशास्त्रानुसारेणका- व्येऽभिव्यक्तस्थायिभावानुभूतिरेव रसः, काव्ये च स्थायिभावाभिव्यक्तिः कविकौशलं विना न सम्भवति। कविकौशलकृताभिव्यक्तिमन्तरा स्थायिभावस्वरूपं सर्वथैवेन्द्रियमानसिकं तिष्ठति, तदनुभूतिश्च न रसानुभूतिः, अपि तु प्रत्यक्षानुभूतिरेव सा। रसानुभूतौ काव्यकलाजन्यचमत्कारस्यानिवार्यतयाऽन्तर्भुक्तिः, इति तं विना रससिद्धिरेव नास्ति। वर्तमानस्य मनोविज्ञानस्य सौन्दर्यशास्त्रस्य वा दृशा भावतत्वकलातत्वयोः पृथगनुभवस्य कल्पनापि नोपपद्यते। वस्तुरुपेणाप्युभयोरविच्छिना स्थितिः, अनुभूतिरूपेण तु पार्थक्यप्रश्नोऽपि नोदेति, उभयोर्हि समञ्जितानुभूतिरेव सौन्दर्यानुभूतिर्भवति रसो वा।

इत्थं करुणादिकस्य दुःखमयत्वं न सिद्ध्यति, इमानि हि प्रमाणानि तद् विरुन्धन्ति—सामान्येन दुःखं प्रत्यत्यन्तायामेकान्तायाञ्चाप्रवृत्तवपि सामाजिकस्य करुणकाव्यं प्रत्याकर्षणं न दुःखानुभूत्या, अपितु कयाचित्सुखानुभूत्यैव प्रयोजनीयम् इत्येकम्।

केवलेन कविकौशलेनाथवा नटपाटवेन समवेतेन बोभयेन प्राप्तश्चत्कारो नात्र पर्याप्तो हेतुः, काव्यनाट्यादिनिरूपितोत्कटशोकभयजनितः क्लेशस्तथा प्रबलः स्याद्यथा कविकौशलं नटकौशलं वा पृथक्-पृथक् समवेतं वा सदुभयमपि तन्निवारयितुं न प्रभुवति। प्राकृतो जनस्तु कौशलमिदं स्फुटतया न प्रत्यभिजानाति। सूक्ष्मचेतसं सहृदयञ्च परितोषयितुं केवलं कौशलमपर्याप्तमिति द्वितीयम्।

स्वीकृते चास्मिन् मते रसकलानुभूत्योः पार्थक्यस्यानुपपन्ता कल्पना कर्त्तव्या स्यात्। या प्राचीने काव्यशास्त्रे, आधुनिके च सौन्दर्यशास्त्रे उभयत्रापि नास्ति मान्येति तृतीयम्।

रसभेदे आस्वादभेद इति स्वीक्रियते चेद् रसस्य परम्परानुमोदितैकरूपता खण्डिता स्यात्। (परमियं प्राचीना शास्त्रीया धारणा-आधुनिकमालोचनाशास्त्रं केवलं परम्पराहेतोरिमां स्वीकर्तुं न बाधितम्) इति चतुर्थम्।अथ तृतीयः पञ्चमश्च विकल्पः। अनयोरिदमेव साम्यं युदभावःदिरसस्य मिश्रानुभूतित्वं मन्येते। एकत्र केवलं सुखदुःखयोर्मिश्रणम्, अपरत्र च नानासंवेदनानां सूक्ष्मं सामञ्जस्यम्। रसस्योभयात्मकरूपतायाः कल्पना भारतीये काव्यशास्त्रे विशेषात्कदाचिद्पि मान्या नाभूत्। यद्यपि प्रतिरसं नानासञ्चारिभावाकल्पनायामेवंविधाः संकेताः निहिताः। यथा श्रृंगार एव तादद् दृश्यताम्—तस्य स्थायिभावो रतिः, सञ्चारिणश्च हर्षब्रीडागर्वादयो न केवलं प्रीतिकराः, यावन्निर्वेदचिन्ताव्याध्युन्मादादयो दुःखात्मका अप्यन्तर्हिताः। इत्थं रतिर्निश्चयेन मिश्रो भावः। सुखदुःखयोरुभयोरपि विभिन्नेनानुपातेन मिश्रणात्तस्यं स्वरूपमसंशयमुभयात्मकम्। आधुनिकं मनोविज्ञानं तर्कप्रयोगाभ्यामिदं सर्वथासिसाधन्। न विस्मयशमयोरेव क्रोधभयादीनामपि सत्यमिदम्। किन्तु न भावेः प्रश्नः—अपितु रसस्योभयात्मकस्यरूपेऽयं प्रश्नः। रसप्रक्रियायां भावानुरूपं दुःखं सहजं, परं तत्परिणतावपि दुःखदंशलेशस्य मान्यतानुपपन्ना। न हि दुःखस्यांशिक्यवस्थितिः पाठकस्य प्रेक्षकस्य वा काम्यतामेति। दुःखमात्रं न रोचते मानवाय—केवलं मात्राभेदात्तस्य काम्यता न सिद्ध्यति। रिचर्ड्समते काव्यास्वादस्वरूपं नेयता रसलम् यत् सुखे आह्लादे वा तत्सीमितं स्यात्। तदतितरां जटिलं वैविध्यपूर्णञ्च। तत्रानेकविधसंवेदनानां सूक्ष्मं सामञ्जस्यमस्ति। अतस्तदतिपूर्णम्। पुनश्चायं प्रश्न उदेति—यदियं तच्च वैविध्यं रसप्रक्रियायां स्तः परिणतौ वा। अस्मन्मते तयोः प्रक्रियैव सम्बन्धोऽस्ति। परिणतौ त्वनेकसंवेदनसूक्ष्मसामञ्जस्यमेव मतिगम्यम्। काव्यास्वादप्रक्रियायां संवेदनानेकत्वं स्वतःस्पष्टम्। भारतीयरसशास्त्रमप्यत्र सम्मतम् यद्रसनिष्पत्तिप्रक्रियायां निश्चयेनैव वैविध्यजटिलते स्तः। प्रमातुश्चेतना नानासुखदुःखात्मकसंवेदनान्तः सञ्चरति। प्रसिद्धं भरतसूत्रं भरतकृतातद्व्याख्या चात्र प्रमाणम्—

'यथा हि नानाव्यञ्जनौषधिद्रव्यसंयोगाद्रसनिष्पत्तिर्भवति, यथाहि गुडादिभिर्द्रव्यैर्व्यञ्जनैरोषधिभिश्च षाडवादयो रसा निर्वर्तन्ते तथा नानाभावोपगता अपि स्थायिनो भावा रसत्वमाप्नुवन्तीति।'

परं परिणतौ तु संवेदनानानात्वं समन्वीयैकतानं भवति। विविधसंवेदनासामञ्जस्यं मूलतो वैविध्यपूर्णं सदप्यन्ततोऽनुभूतेरैक्यमेव प्रतिपद्यते। विविधानां संवेदनानामास्वादोऽपि विविधः। संवेदनानां वैविध्यस्यास्वादोऽपि मिश्रः स्यात्, किन्तु तेषां सामञ्जस्यास्वादस्त्वखण्ड एव, प्रीतिकर एव च स्यात्। यतः– सामञ्जस्यं हि नामानेकतायामेकत्वस्थापनम्। अतोऽनुभववैविध्यमेकत्वेपरिणस्यति। अनुभवस्तरे सामञ्जस्यपदार्थोऽन्तःकरणवृत्तीनां समाहितिश्चित्तसमाहितिर्वा, चित्तसमाहितिश्च यदि नास्ति, स्वयमानन्दरूपा, तदा तस्य भूमिका तु सास्त्येव। अतो रिचर्ड्स आनन्दं न प्रतिषेधति- सुखमाह्लादमपि स न निषेधति, किन्तु काव्यास्वादं सुखमात्रमाह्लादमात्रं वा यावदेव सीमितं न मन्यमानोऽप्युदात्ततरमवदाततरञ्च मनुते। वस्तुतोऽत्र भ्रमहेतुरांग्लभाषायाः प्रीत्यपरपर्यायः प्लेजरशब्दः एवास्ति, यः स्वयं लघुं गाधञ्चानुभवविशेषं बोधयति। आनन्दस्तदपेक्षया नितरामुदात्ततरोऽवदाततरश्च भवति। आनन्दशब्दः स्वकीये समग्रेऽर्थे गृह्यमाणो विवादमिममुपशमयति।

# संदर्भग्रन्थाः

1-नाट्यशास्त्र :काव्यमाला पृष्ठ-93
2-साहित्यदर्पण : 3:23
3-रसगंगाधर का शास्त्रीय अध्ययन: डा0 प्रेमस्वरूपगुप्त पृष्ठ:204
4-नाट्यशास्त्र : 6:37
5-अभिनवभारती पृष्ठ-50
6- अभिनवभारती पृष्ठ-119
7- अभिनवभारती पृष्ठ-219-20
8- अभिनवभारती पृष्ठ-462
9-काव्यप्रकाश : 1:2 वृत्ति
10-साहित्यदर्पण : 3:4:5

दर्शनमनोविज्ञानयोः प्राविधिकीं शब्दावली परित्यज्य समान्यतया शब्दावल्या वक्तुं शक्यते यथा 'शब्दार्थमाध्यमेन भावस्य कलात्मिकाभिव्यक्तिः काव्यम्' इति। तस्य चानन्दमय आस्वादो रस इति। शब्दार्थमाध्यमेनाभिव्यक्तस्य भावस्यानन्दमयास्वाद एव रस इत्याशयः। नूनमयमास्वादो विषयिगतः, न तु विषयगतः, इयं ह्यास्वादयितुरेवानुभूतिः। परं नेयं समस्या सुसमाधेया। यदि ह्येवमस्ति तदा 'रसात्मकं वाक्यं काव्यम्, रस एव काव्यसार इति रसवादिनांमतिप्रसिद्धानि सूत्राणि किमर्थकानि स्युः। किं काव्यसारस्य स्थितिः काव्यकलेवराच्छब्दार्थयुगलाद्बहिः सहृदयस्य हृदये चैतन्ये वा मान्यते। वस्तुवादिदृशा रसपदार्थो विशिष्यते यः काव्यशरीरे शब्दार्थयुगले सारतयाऽऽत्मतया वा विद्यते। अद्वैतवादिनो व्यक्तिवादिनो वा दृशा रसशब्दस्य व्यावहारिकप्रयोगमात्रमिदम्। अस्य तावद्वास्तविकोऽर्थः स काव्यस्य गुणः सा वा तस्य शक्तिरस्ति या सहृदयस्य रसास्वादे निमित्तीभवति। रसमयस्य वाक्यस्यायमर्थो यद्यः शब्दार्थप्रयोगः सहृदयहृदयं व्यक्तिगतरागद्वेषनिर्मुक्तं विधाय रत्यादिस्थायिभावमाध्यमेन तस्यामानन्दं ददादीति। स शब्दार्थप्रयोगोः यः सहृदयस्य रागात्मककलात्मकमानन्दं वितरतीति चाधुनिकशब्दावल्यां तदर्थः। अद्वैतवादिनो व्यक्तिवादिनो वादृशा रस आस्वाद एव न पदार्थः। काव्यगतरसपदस्य तात्पर्य न कश्चिद्वस्तुपदार्थविशेषः अपि तु गुणविशेषो यः सहृदयस्य रसास्वादे निमित्तीभवति। किन्त्वेतावतापि व्याख्या न समाप्यते।अथाय प्रश्न उदेति यच्छब्दार्थयोरणं गुणः शक्तिर्वेयं कुतः समायाति? शब्दार्थौ हि प्रतीकमात्रम्, तत्र च केवला व्यञ्जनाशक्तिरेव। प्रमातृचित्ते भावमाह्लादं चोद्बोधयितुं शक्तिस्तु भाव एव सम्भवति। भावश्चायं कवेरेव, यः शब्दार्थौ प्रयुङ्क्ते। अतो रसास्वादे सहृदयस्य भावुकतामात्रं न प्रमाणम्, कवेर्भावुकतापि तत्र तुल्योपकारिणी। प्रमातुः सहृदयतामात्रे प्रमाणीकृते तु काव्यस्य मूल्याङ्कनमेव न सम्भवेत्। यशोधरा भारतभारत्याः सरसतरेतयस्यार्थो यदि गृह्यते यद्यशोधरया भारतभारत्यपेक्षया सहृदहृदयं चमत्कृततरं भवति तदा प्रश्नः स्यात्- किमत्र कारणमिति। इदं सहृदयहृदयस्य चमत्कृततरत्वम्कारणं न भवति, अस्य कारणं यशोधरायामेवान्वेष्टव्यं स्यात्। अलंकारवादी ब्रूयात्-यशोधरायां शब्दार्थप्रयोगो भारतभारत्याश्चारुत्तरो वक्रतरश्चास्तीति किन्तु रसवादिनो न तावता तुष्टिः। तेन तु वक्तव्यमेव-यशोधरायाः शब्दार्थयोर्भावव्यञ्जनाशक्तिरधिकतरास्तीति। परमस्याः शक्तेराधारो नूनं कविरेव सिद्ध्यति। भरतोऽवगच्छति स्मैतत्थ्यम्, प्रस्तुतसिद्धान्तस्य परमसमर्थः प्रवक्ताऽभिनवोऽपीदं सम्यववागच्छत्-काव्यगतभावस्य मूलाधारोऽस्ति कविगतो भाव इति। तत एवाह——

कवेरन्तर्गतं भावं भावयन् भाव उच्यते।इति।

तदेवं मूलबीजस्थानीयः कविगतो रस इति।

इति कविगतयोर्भावरसयोरनुसन्धाने कृते रसस्थानसमस्या सुतरां समाधीयते।

काव्यास्वादेऽस्मत्समक्षं मूलतस्तिस्रः सत्ता उपतिष्ठतेकविः, वस्तु, सहृदयश्चेति। आधुनिक्या शब्दावल्या ताः परिचेतुं शक्यन्ते । कविर्नाम सा व्यक्तिर्याऽनुभूतिं संवेद्यां करोति, वस्तु तत्वतस्तदनुभूतिः, सहृदयश्च सा व्यक्तिर्या कविसंवेद्यानुभूतिं

गृहणाति। वस्तु मया तत्वतः कवेरनुभूतिरित्युक्तम्। तत्र विप्रतिपत्तुं शक्यते। संस्कृतसाहित्यशास्त्रे तु वस्तुनः कवेरनुभूतेः पृथक्त्वं स्वीक्रियत एवेति वस्तुशब्दोऽप्याह। अद्यापि प्रश्नः सम्भवति ऐतिहासिकं वृत्तम्, लोकप्रचलिता कथा, घटना वा-यत्कविना स्वकाव्ये मूलसामग्रीत्वेन प्रयुज्यते तत्कवेरनुभूतिरिति कथं वक्तुं शक्यम्। तदुत्तरञ्चेदम्, यत्कविः कथां वृत्तं वाद्दिश्य कदापि न विवक्षति, स तद्व्याजेन स्वानुभूतिमेवाभिव्यनक्ति। तत्र कथादीनां महत्वमुद्दीपनाद्या माध्यमीभावादतिरिक्तं न भवति। संवेद्या हि तत्र कवेरनुभूतिरेव, न तु कथाणुरपि। परोक्तं पुनर्वक्तुमेव कः पुनर्वक्ष्यति। सामान्येन यदि वयं किञ्चित्परोक्तमक्षरशोऽप्यावर्तयामस्तदा वस्तुतः सास्माकमात्मीयैवोक्तिर्भवति। स्वाशयप्रकाशनं हि तत्र परमोद्देश्यं भवति। न परोक्तिः पुनरुक्तिः। अतस्तत्वतो वस्तुसत्त कविव्यक्तित्वान्नातिरिच्यते। अत एव वस्तुनि विषये वा रसानुसन्धानमर्थवादममात्रम्। वस्तुनि भट्टलोल्लटोक्तौ नायिकानायकावप्यन्तर्भवतः। एतौ नायिकानायकौ (ऐतिहासिकौ, पौराणिकौ कल्पितौ वा स्याताम्) काव्ये कवेः पृथक् स्वास्तित्वं न दधाते। तयोरैतिहासिकमस्तित्वं व्याजमात्रम्, व्यक्तित्वं च सर्वथा निर्विशेषम्। देशकालसीमितयोः शकुन्तलादुष्यन्तयोः सामाजिकानां कृते तदा न किञ्चिन्महत्वम्। अस्येदं प्रमाणम् यथ शकुन्तलादुष्यन्तयोनर्नामनी परिवर्त्य जयश्रीचन्द्रमोहननामनी क्रियेते चेत्, वयं वेतिहासं (महाभारतं) न विद्याम चेत्, कश्चित्पुरात्ववेत्ता वाऽसन्दिग्धतयेदं प्रमाणयेच्चेद्यन्महाभारते शकुन्तलोपेद्व्याख्यानं प्रक्षिप्तमस्तीति तदापि शाकुन्तलमधीयानानामस्माकं काव्यानुभूतिः स्यादेव। वाल्मीके रामो वस्तुत ऐतिहासिकः (यद्यप्येतन्न सम्भवति) अथ दृश्यताम् यद्यदा वाल्मीकेरैतिहासिको रामस्तुलसीदासस्येतिहासभिन्न ईश्वरावतारो रामः, मैथिलीशरणस्य चाधुनिको लोकनायको रामः, माईकलमधुसूदनदत्तस्य चेतिहासविपरीतो रामः सर्वेऽपि नः प्रापयन्ति रसदशाम्, तदा रसदृष्ट्यैतिहासिकस्य रामस्य किं महत्वमवशिष्यते।

कवेः सहृदयस्य च। कविः स्वानुभूतिं सहृदये तथा प्रेषणीयां निर्माति यथा तां प्राप्य सहृदयेनानन्द उपलभ्यते। यथा मयोक्तपूर्वम्—सहृदयस्य रसानुभूतौ न कस्यचिदपि सन्देहसम्भवः। परमयं प्रश्नस्त्वावदुदेति यथास्य रसस्य स्थितिरुभयोः कतरस्मिन्नस्तीति। एतस्य तदेवोत्तरं यदभिनवगुप्तेनोल्लिखितम्—'सहृदये' इति। यदा हि वयं प्रसीदामस्तदा वहृदयरसस्य, निजात्मानन्दस्यैवानुभवेन । आनन्दस्थितिस्तु नूनमस्मन्मस्येवास्ति। इति स्वदेश्या अध्यात्मदर्शिनो विदेश्या मनोवैज्ञानिकाश्च समानतयैव मन्यन्ते। भारतीयदर्शनानि सुखं निजात्मविस्तारं तत्र चानन्दं निजास्मितावृत्तिसमास्वादनं वदन्ति। आत्मनोऽनात्मव्याजेनास्वाद एव रसः। 'अहमस्मि' इतीदं रससारतत्वम्।

अथ सहृदयहृदयमेव रसस्थामिति निश्चिते प्रश्नान्तरं पुरःस्फुरति—'कविः कथ स्वानुभूतिमित्थं संवेद्यां कर्तुं पारयति, यदिदसंग्रहणेन सहृदयस्य रसचेतना जागर्ति, इति। तस्येदमुत्तरम्—'स्वहृदयरसे तां निमज्जयेति। स्वानुभूतिं व्यञ्जयितुं कृतार्थस्य कवेरपि भवति। निजात्माभिव्यक्तिगतास्मितास्वादनरसः। सहृदयस्य च कविसंवेदितानुभूतिग्रहणकालिकस्वास्मितास्वादनम्। इत्थं कविः स्वानुभूत्या सह

स्वरसमपि सहृदयाय प्रेषयति, अतो रसस्थितिः कवेर्मनस्यपि भवतीति तावदेवानिवार्य माननीयं भवति, यावत्सहृदयम्य। यदि हि कविकथने रसो नास्ति तदा सहृदयहृदये स्थितोऽपि रसो गुप्तः स्यान्न प्रकाशेत। तथैव यदि सहृदयहृदये रसो न स्यात्तदा कवेः संवेद्यं निष्फलं निष्पद्येत। प्रथमतथ्योदाहरणतया रससामग्रसम्पन्नान्यनेकानि नीरसानि पद्यानि, द्वितीयतथ्योदाहरणतया च सरसपद्यप्रभाविता बहवोऽरसिका व्यक्तयः। कविताप्रथमस्फुरणसम्बद्धा जनश्रुतिः— यत्रादिकवेः शोकः श्लोकत्वमागतः, भट्टतौतस्य च सिद्धान्तः—नायककाकविश्रोतृणामनुभवः समानो भवति, अभिनवगुप्तेन च समर्थितेयं भरतोक्तिः—(कवेरन्तर्गतं भावं भावयन् भाव उच्यते)इत्यमी सर्वेऽपि सन्दर्भा असन्दिग्धतया प्रमाणयन्ति यत्संस्कृताचार्याः कविहृदयरसेन परिचितास्त्ववश्यमासन्, पर संस्कृतसाहित्यशास्त्रे ते विधानतया कवेरनुभूतिं पृथगेवास्थापयन्। भट्टतौतस्य सिद्धान्तोऽप्युपेक्षितप्रायोऽभूत्।

इति श्रव्यकाव्यचर्चा। किन्तु दृश्यकव्ये नटीनटयोरपि सत्ता माननीया स्यात् अनयो रसास्वादेन कः सम्बन्धः? इति प्रश्ने रसस्थितिस्तयोरपिहृदये स्वीकार्या स्यात्। नटीनटाभ्यामनिवार्यतया सहृदयाभ्यां भवितव्यम्, अन्यथा तौ कविसंवेद्यस्योचितमाध्यमतां नार्हतः। प्रथमस्वयंगृहीतसंवेद्यानुभूती तौ सहृदयं यावदपि संवेद्यं वोढुमर्हतम्, अतस्तस्याहाय्यप्रतिषेधे कृतानि संस्कृताचार्याणां सर्वाण्यपि प्रयतनानि नूनमनुचितानि।

अन्ते चैतन्निष्कृष्यते— काव्यं पठित्वां नाट्यं वा दृष्ट्वा सहृदयोयं रसमास्वदते, तस्य मूलतः स्थितिस्तदीय एव हृदये भवति। सा हि तस्य स्वास्मितास्वादरूपा। इदमपि तदेवोपपद्यते यदा कविः स्वानुभूतिं सहृदयं यावत्प्रापयितुं स्वयं स्वास्मितारसमास्वादितवान् स्यात्। नाट्ये नटीनटविषयेऽपि तथ्यमिदं स्वीकार्यम्।

कविगतत्वेन रससिद्धौ काव्यशास्त्रस्यैको महत्वपूर्णः प्रश्नः पुरः स्फुरति— रसस्य सम्प्रेरणं वा भवत्यभिव्यक्तिर्वेति। रसो मूलतः कविगतानुभूतिरेव, काव्यगतशब्दार्थमाध्यमेन तस्याः सामाजिकहृदये सम्प्रेषणं सञ्चारो वा भवतीति सम्प्रेषणपदार्थः। पाश्चात्यकाव्यशास्त्रे विषयेऽस्मिन्मतद्वयम्। तत्र प्राचीनानामिदम्—सर्वे तावदेकेन चैतन्यतत्वेनानुस्यूताः, अतः प्रतिपरिस्थिति प्रतिघटनं सर्वेषामपि हृदयेष्वेकैव प्रतिक्रिया भवति। इयं धारणा वस्तुतः एकात्मवादमाश्रिता, पाश्चात्यानां ब्लेकादिरहस्यवादिचिन्तकानामप्ययमेव विश्वासिति किन्तु नांगीकरोति आध्यात्मिकमाधारम्। अतस्तद्धारणायां किञ्चिदन्तरमायति।